गीतगङ्गाधरम्

[रागकाव्यम्]

रचयिता

श्रीकल्याणकविः

सम्पादक :

डॉ० प्रभातशास्त्री

गीतगङ्गाधरम्

[रागकाव्यम्]

रचयिता

श्रीकल्याणकविः

सम्पादक :

डॉ० प्रभातशास्त्री

प्रकाशक :
कौशाम्बीप्रकाशनम्
दारागंज, इलाहाबाद—६

प्रथमसंस्करणम्
सन् : १९८७ ई०
मूल्यम् : १५ मुद्राः

मुद्रक :
देववाणीमुद्रणालयः
बैरहना, इलाहाबाद—३

GITAGANGADHARAM
[RagaKavyam]

By
Kavi Kalyana

Edited By
Dr. Prabhat Shastri

Published By
Kaushambi Prakashan
Daraganj, Allahabad.

First Edition
1986
Price Rs. 15/-

Printed At
Devavani Mudranalaya
Allahabad—3

गीतगङ्गाधरम्

विषयानुक्रमः

भूमिका

मद्रासनगरात् स्वर्गीयडाक्टरराघवन्महाभागानां संपादकत्वे प्रकाशितस्य 'न्यू कैटलागस् केटलागारम्' नामकग्रन्थस्य तृतीयभागे २४८ तमे पृष्ठे कल्याणनामकानां त्रयोविंशतिकविवराणां समासेन संस्तवो वर्तते[१]। तत्र प्रस्तुतरागकाव्यस्य विषये केवलमिदमेव लिखितं वरीवर्ति यद् गीतगङ्गाधरकाव्यस्य प्रणेता कल्याणकविः। कृतिरियम्—महाकविजयदेवप्रणीतस्य गीतगोविन्दकाव्यस्याऽनुकरणात्मकमेकं द्वादशसर्गात्मकं काव्यं वर्तते। एतदतिरिक्तमस्य कविवरस्य विषये अन्यत्र कुत्राऽपि सूचना नैव प्राप्यते। कविनाऽप्येतस्य काव्यस्य प्रारम्भे एकस्मिन् पद्ये स्वयमपि सादरं महाकविजयदेवस्य स्मरणं विधाय एतत्स्वीकृतं तद्यथा—

यद्यप्यष्टपदीप्रबन्धरचने नाऽन्योऽस्ति कुत्राऽप्यहो !
विद्वान् श्रीजयदेवपण्डितकवेस्तत्कीर्तिमाप्नोति यः ॥
प्रांशोः पङ्गुरिवाऽनुयामि पदवीमीशानकीर्त्युच्चकै-
र्यष्ट्याधारबलेन तस्य विदुषां श्रेष्ठैर्दुरापामपि ॥

द्रष्टव्यं प्रथमसर्गस्य प्रथमपृष्ठम् ।

एतस्मात् परमयं कविः कदा कं देशं कतमं कुलं स्वजन्मना विभूषयामासेति संस्कृतभाषाया अन्यप्राक्तनकवेरिव अन्धकाराच्छादितमेव वर्तते। केवलं नाम्नाऽयमुत्तरभारतीयः प्रतीयते। अधोऽङ्कितं गीतद्वये—विष्णुजभणिता विष्णुसम्भवकेन चेति प्रयोगोऽस्ति :—

इति गिरिजायाः जयति जयायाः निकटगतायाः वाणी ।
विष्णुजभणिता शिवसखिगणिता मानिनिशातकृपाणी ॥

प्रथमसर्गस्य पृष्ठम् ६ ।

---

१. विवरणम् भूमिकान्ते द्रष्टव्यम्

एवमेतदुमानुकूलनवर्णनं सुखदायि ।
विष्णुसम्भवकेन यन्निरयापहं निरमायि ॥

प्रथमसर्गस्य पृष्ठम् १० ।

अनेन एतदीयपितृपादानां नाम विष्णुरासीदिति स्पष्टतया दन्ध्वनीति । भक्तिरसाप्लावितेनानेन काव्येनेत्यपि प्रतीयते यदयं शिवोपासकः । पुनः पाठकानां पुरतः प्रश्नोऽयं समायाति यदुत्तरभारतस्य कस्मिन् जनपदे कस्मिन् काले अयं जन्म अधिगृहीतवान् । सर्वमिदं विवादास्पदमेव दरीदृश्यते ।

अस्मिन् रागकाव्ये प्रत्नानां रागरत्नानां प्रयोगेणेत्यनुमीमहे यदयं कविश्चतुर्दशशताब्दीकः पञ्चदशशताब्दीको वा भवेत् । यतो हि एतदनन्तरं सङ्गीतशास्त्रे मुगलानां सङ्गीतस्य प्रभावः सुस्पष्टं दृग्गोचरो भवति । रागाणां नाम्नि परिवर्तनं सञ्जातमितिः नाऽप्रत्यक्षं प्रेक्षावताम् । अधिकं किं ब्रूमः । प्रसिद्धस्य तबलावाद्यस्योत्पत्तिः मुगलकाले मृदङ्गादेव सञ्जातेति निगदन्ति सङ्गीतशास्त्रमर्मज्ञाः विज्ञाः । अग्रे चर्चितबम्बईनगरस्थितपाण्डुलिपिप्रतेराधारेणापि एतस्य कवेः स एव समयस्तर्कितुं शक्यते, यतो हि संचार-मुद्रणादिसाधनविरहिते काले कस्यापि कोविदस्य कृतेः प्रसाराय एकशताब्दीको द्विशताब्दीको वा समय अपेक्ष्यते ।

प्रस्तुतरागकाव्यस्य सम्पादने प्रतित्रयस्याधारः समुपलब्धः । तत्र प्रथमा प्रतिः वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसरस्वतीभवनपुस्तकालये विद्यमानायाः पाण्डुलिपेः प्रतिलिपिं विधाय सुहृद्वरपण्डितप्रवरश्रीवटुकनाथशास्त्रिणा प्रहिता । टिप्पणे इयं 'क' संज्ञिका । देवनागरीलिपिलिखितेयं पूर्णरूपेण शुद्धा न विद्यते ।

द्वितीयाप्रतिः बम्बईनगरविराजमानरायलएशियाटिकसोसायटीपुस्तकालयस्था । अस्या अपि लिपिः देवनागरी एव । प्रथमाऽपेक्षयाऽस्याः लिपिस्तु सुस्पष्टा, किन्तु पूर्णतया शुद्धा नाऽस्ति । प्रतिरियं 'ख' 'संज्ञिका' । अस्यां प्रतौ ग्रन्थस्यान्ते 'संवत् १७२७ वर्षे मार्गशीर्ष सुदि १४ सोमे लिखितम्' इत्युल्लेखोऽस्ति ।

तृतीया प्रतिः इन्दौरनगरनिवासिना मित्रवरेण डा० लक्ष्मणनारायण शुक्लमहोदयेन प्रेषिता, सा च उज्जैननगरस्थसिन्धिया पुस्कालयप्रतेः प्रतिलिपिस्वरूपा। प्रतिलिपिरियमत्यन्तमशुद्धा यत्र तत्र खण्डिता च 'ग' संज्ञिका।

इत्थं प्रतित्रयाणामपि पूर्णरूपेण शुद्धताऽभावादस्य रागकाव्यस्य संपादने पदे पदे महत्काठिन्यमनुभूतम्। तत्सर्वं टिप्पण्याः पठनेन स्पष्टतया भासते।

प्रस्तुतकाव्ये द्वादश सर्गाः सन्ति। प्रत्येकसर्गसमाप्त्यनन्तरं पुष्पिकायां सर्गवर्णितविषयाऽनुसारेण तत्सर्गस्य नाम कविना कृतम्—यथा प्रथमसर्गस्य 'शिवानुनयः' द्वितीयसर्गस्य शिवाऽनुकूलनवसन्तवर्णनः, तृतीयस्य विभीषिकाप्रदर्शनः चतुर्थस्य सोत्कण्ठशिवः पञ्चमस्य पार्वतीप्रसादनः, षष्ठस्य पार्वतीपश्चात्तापवर्णनः, सप्तमस्य कलहान्तरितावर्णनः अष्टमस्य पार्वतीदशावर्णनः, नवमस्य उत्कण्ठितावर्णनः दशमस्य मुदितमन्मथान्तकः, एकादशस्य शिवप्रसादनः द्वादशस्य च स्वाधीनपतिकाशिवासौभाग्यवर्णनः इति वरीवर्ति। एतैः सर्गनामभिरेव काव्ये कथायाः समासेन परिचयं प्राप्तुमर्हन्ति प्रबुद्धपाठकाः।

अस्मिन्काव्ये पञ्चविंशप्रबन्धाः सन्ति। महाकविजयदेवप्रणीते गीतगोविन्दकाव्ये प्रत्येकं गीतं प्रबन्धशब्देन व्याह्रियते। अतस्तत्परम्परायां प्रणीतेष्वन्येष्वपि काव्येषु प्रत्येकगीतं प्रबन्ध इति पदेन व्याहर्तुं वयं शक्नुमः।

प्रथमतो महाकविजयदेवेन स्वकीये गीतगोविन्दकाव्ये यस्मिन् पद्ये प्रबन्ध इति शब्दस्योल्लेखो विहितस्तत् पद्यमवलोक्यताम्

वाग्देवताचरितचित्रितचित्तसद्मा,
पद्मावतीचरणचारणचक्रवर्ती।
श्रीवासुदेवरतिकेलिकथासमेत—
मेतं करोति जयदेवकविः प्रबन्धम्॥

श्लोकेऽस्मिन् प्रयुक्तप्रबन्धशब्दस्य प्राज्ञैः काव्यमर्मज्ञैः विभिन्नटीकाकारैः स्वस्व प्रतिभाऽनुसारेण विभिन्नरूपेण विवेचनं विश्लेषणञ्च विहितम्। तेषां सर्वेषामुल्लेखनमधुनाऽप्रासङ्गिकन्न भवेत्।

कुम्भनृपतिकृता गीतगोविन्दस्य रसिकप्रिया नामिका टीका वर्तते। तत्र प्रबन्धशब्दस्य व्याख्या कुम्भनृपतिना यथा कृता तन्निभालयन्तु पाठकाः—प्रबन्धः स्फुरदिव चमत्कारितामापद्यते। तथा चोक्तम्—

उचितार्थविशेषेण प्रबन्धार्थः प्रकाशते।
गुणप्रभावभव्येन विभवेनेव सज्जनः॥

यथा—जातं वंशे भुवनविदिते पुष्करावर्तकानामित्यत्राचेतनस्य चेतनाऽध्यारोपेण मेघस्य दौत्ययोग्यताऽभिधानाय प्रथितपुष्करावर्तकाद्युपन्यस्तम्। अत्र टीकाकारेण प्रमाणत्वेनोद्धृतः 'उचितार्थविशेषेण' इति श्लोकः कुत्रत्य इति न सङ्केतितः। अपरा सञ्जीवनी नामिका व्याख्या श्रीवनमालिभट्टमहोदयेन प्रणीता प्राप्यते। तत्र टीकाकारेण प्रबन्धशब्दार्थविषये भोजराजविहितश्लोकस्योद्धरणं प्रमाणत्वेनेत्थं प्रदर्शितं यथा—प्रबन्धचिह्नं भोजे—

शृङ्गारैकप्रधानो यो गीततालादिसंयुतः।
अभिसारार्थनिपुणः प्रबन्धः सम्प्रकीर्तितः॥

प्रकर्षे बन्धोऽन्योन्याऽऽसक्तिरूपो नायिकानायकयोर्यत्र सः प्रबन्धः। भट्टमहोदयेन भोजराजकृतस्य कस्य ग्रन्थस्याऽयं श्लोक इति नाऽलेखि। एका गीतगोविन्दस्य पदद्योतनिकाऽभिधा टीकाऽभिधीयते। अस्यां टीकायां टीकाकारनारायणपण्डितेनास्यैव शब्दस्य व्याख्या कृष्णकेलिकथाप्रतिपादकं ग्रन्थं करोति-इति कृता। जयन्तीनामकटीकाकारेण कृष्णविदुषा—'प्रबन्धम्—गीतगोविन्दसंज्ञकम्'-एतावन्मात्रं समासेन कृतम्। तत्र प्रमाणत्वेन टीकाकारकृष्णमहोदयेन अमरकोषस्य श्लोकांशः 'प्रबन्धः कल्पना कथा' इत्युद्धृतः।

गीतगोविन्दस्य प्रत्येकगीतम्-विदुषां मते प्रथमप्रबन्धः द्वितीयप्रबन्धश्चेति रूपेण विद्वज्जनैराभाष्यते। एतेनेत्थं प्रतीयते यत् टीकाकारो विद्वद्वरकृष्ण महोदयः गीतगोविन्दकाव्यस्य प्रत्येकगीते-कृष्णराधाविषयकरतिकेलिकथावर्णनं कल्पनाकलितं स्वीकरोति न तु ऐतिहासिकतथ्यसंवलितं मन्यते। अस्तु, अस्मात् कारणादेव कतिपये विद्वांसो अष्टादशमहापुराणेष्वन्यतमे श्रीमद्भागवते वैष्णवभक्तानामाराध्याया राधायाः चर्चा न प्राप्यते इति प्रणिगदन्ति।

नन्वास्तां तावत्, विस्तृतरूपेणात्र विषये रसिकप्रियाटीकासहितस्य प्रकाशयिष्यमाणस्य गीतगोविन्दस्य भूमिकायां विचारयिष्यामः ।

मम कथनस्यायमाशयः यत् प्रबन्धशब्दार्थप्रतिपादने गीतगोविन्दस्य विभिन्नटीकाकारैः प्रत्नैः पण्डितरत्नैः मुण्डे-मुण्डे मतिर्भिन्ना इति सूक्तिः पूर्णरूपेण चरितार्थीकृता ।

अथ प्रस्तुतरागकाव्यविषये किमपि कथयामः । अस्मिन् रागकाव्ये सन्ति द्वादशसर्गाः इति मया पूर्वमेव प्रतिपादितम् । कविना मनोयोगपूर्वकं महाकविजयदेवप्रणीतं प्रथितं गीतगोविन्दकाव्यं समधीत्य तत्काव्यात् प्रेरणामवाप्येदं काव्यन्निर्मितमिति तु काव्याऽऽरम्भे ग्रन्थकारेण स्वयमेव स्वीकृतम् । अस्य कथनस्य ममाऽयमाशयो नाऽस्ति यदस्मिन् काव्ये कवेः काऽपि मौलिकता पदप्रयोगपटुता शब्दशय्याया मृदुता मधुरता च नैव राराजते । एतद्विपरीतं कविवरकल्याणेनाऽस्मिन् काव्ये कस्यापि विषयस्य वर्णने हृदयहारिचित्रणे च स्वकीयं प्रातिभं कौशलं पदप्रयोगे प्राचुर्येण माधुर्य्यञ्च पदे पदे प्रदर्शितम् । दृश्यतामेकस्मिन् गीते धवलशब्दप्रयोगे प्रातिभं कौशलम्—

धवलगविस्थधवलशशिभूषणधवलधुनीधरदेवम् ।
धवलवृषध्वजधवलवपुर्धरधवलविभूतिदसेवम् ।।
सा ददर्श गिरिजा गिरिशं गुरुशङ्कितसस्मितचित्ता । ध्रुवपदम्

धवलयशोधवलीकृतविश्वधवलसुमनःप्रियमीशम् ।
धवलभुजङ्गभुजाऽऽभरणं स्तुतिसङ्गतसर्वदिगीशम् ।।

धवलविहंगमधवलपुष्पपरिपूजितधवलपदाब्जम् ।
धवलदन्तदीधितिधवलीकृतकण्ठनालवदनाब्जम् ।।

धवलवसनधरधवलहारधरसुरवनितापरिगीतम् ।
धवलकपालकलितकरकङ्कणधवलमुण्डपरिणीतम् ।।

धवलस्मितधवलीकृतमन्दरकन्दरसुन्दरभावम् ।
धवलभावभावितपदपङ्कजभक्तदुरितवनदावम् ।।

धवलाऽमलमुक्ताफलहारधरं धवलाऽचलभासम् ।
अनुकुर्वन्तमधश्चरितारुधवलजलधारविलासम् ॥
धवलचमरयुगलेन धवलजलधारधवलगिरिभासा ।
धवलधामचिन्तनधवलीकृततनुमतिसिततरभासा ॥
असितदुरितमलिनीकृतजनधवलीकरणक्षमधाम ।
जयति जगति कल्याणनुतं विश्वेशधवलतरधाम ॥

पृष्ठम् ४७ ।

स्फीते गुर्जरीरागेण गीयमानेऽस्मिन् गीते कविकृतधवलशब्दप्रयोगजनित-चमत्कृतिविच्छित्तिः सहृदयानां पाठकानां मनसि किमप्यनुभवगम्यममन्द-मानन्दं जनयतीति मदीये कथने अतिशयोक्तिर्न ।

एवमेवाऽस्मिन् रागकाव्ये कल्पनाकलिताः ललिताः बहवः श्लोकाः अपि वर्तन्ते । तेष्वेकस्सूर्यास्तवर्णनात्मक अद्भुतकल्पनासंवलितः श्लोकः पठ्यताम्—

सन्ध्यारागविराजितेऽम्बरतले रेजे रविर्बिन्दुवत्,
सिन्दूरस्य सुलोचनाऽलिकतले रक्तेऽतिरोषादिव ।
प्राचीदिङ्मुखगेन्दुमीक्ष्य परमं मित्रत्वमाप्तःस्वयम्,
तस्मादेव कलङ्किवीक्षणभयादस्तं हि यास्यन्वहम् ॥

पृष्ठम् ४४ ।

प्रतिदिनं भगवान् भास्करः सन्ध्यासमये कथमस्तमितो भवतीत्यस्मिन् विषये सहृदयहृदयहारिणी मौलिकी कल्पना कीदृशी कृताऽस्मिन् श्लोके कविना कल्याणेन सा वर्णनाऽतीता ।

एवमेवाऽस्मिन् काव्ये एतादृशा अन्येऽपि बहवः श्लोकाः वर्तन्ते । विस्तर-भिया ते नोदाह्रियन्तेऽत्र । अस्तु, अस्मिन् रमणीये रागकाव्ये कमनीयानि गीतान्यपि सन्ति । तेषु हृदयहारि गीतमेकं पाठकानां मनोविनोदायाऽत्रोद्-ध्रियते—

विचकिलविविधलताललितालिकुलाकुलतरुततिकुञ्जम् ।
अरुणरसालमधुपयुतकिसलयदलपरितर्जितगुञ्जम् ॥

मानिनि ! दिशि दिशि पश्य वसन्तम् ।
त्वामिव कुसुममिषेण हसन्तम् ॥ ध्रुवपदम्

मृदुतरपरिमलयुतमलयानिलकम्पितकिसलयशोभम् ।
संयमिनामपि मन्थरगामिनि ! जनितमनोभवलोभम् ॥

परिमलमिलदलिसंकुलकलिकाकलितरसालरसालम् ।
पश्य वनं निविडं परिफुल्लितदिव्यलाततरुजालम् ॥

सकलसुगन्धिकुसुममधुमत्तमधुव्रतकुलकलरावम् ।
जनयति मनसि समाधिमतामपि सुन्दरि ! मनसिजभावम् ॥

कोकिलकलरवकलितलताललितं बहुतालतमालम् ।
मालतिकेतकिजातिलता सुषमासुभगं सुविशालम् ॥
दिशि दिशि कुसुमितकिंशुककुड्मलवृन्दविजृम्भितभृङ्गम् ।
वनमनङ्गनृपरचितशिविरमिव शोणलसत्पटतुङ्गम् ॥
अनुभव सखि ! नवदोलमहोत्सवमङ्कगता शशिमौलेः ।
अलिकुलकोकिलकलरवकिन्नरगीतमनुकलय शैले ॥
इति सखिवचनमुमामनुनयपरमृतुपतिवर्णनसारम् ।
कल्याणेन जयतु कथितं शमिताऽखिलमानमुदारम् ॥

पृष्ठम् १४ ।

वसन्तरागेण गीयमानं रसभृतं प्रस्तुतं गीतं कवेः नवनवोन्मेषशालिप्रतिभायाः प्रत्यक्षं प्रमाणम् । इत्थमस्मिन् काव्ये रसभृतान्यन्यानि गीतान्यपि वर्तन्ते । काव्यं प्रपठ्य सहृदयैः पाठकैस्तदनुभूयताम् । इत्थं कृतिकारविषये काव्यसम्बन्धे च समासेनोल्लिख्य विरमामो वयम् । भूमिकासमाप्तिपूर्वमस्य काव्यस्य प्रतिलिपिप्राप्तिकरणे सम्पादने च साहाय्यकारिणां विषये किमपि कथनमावश्यकं मन्ये ।

प्रथमतः, सुहृद्वरकाशीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयपूर्वविभागाध्यक्षेण कविवरपण्डितश्रीवटुकनाथशास्त्रिमहोदयेन वाराणसीस्थसरस्वतीभवनपुस्तकालये वर्तमानहस्तलिखितयथास्थितप्रतेः यथामति प्रतिलिपिं विधाय

मदन्तिके प्रेषिता । तत्कृते ते धन्यवादार्हाः । किन्तु तस्याः प्रतेः पदे पदे पाठ-भ्रष्टतावशात् सम्पादने महत्काठिन्यमनुभूय पुस्तकरूपेण मुद्रणस्यैव नाभवत् । कियद्वर्षानन्तरमस्य रागकाव्यस्य भारतवर्षस्य कस्मिन् कस्मिन् ग्रन्थागारे हस्तलिखितप्रतिः वरीवर्तीति ज्ञानाय भारतीयविभिन्नपुस्तकालयस्थितहस्त-लिखितग्रन्थानां सूचीपत्रं मया विलोकितम् । तदवलोकनेन ज्ञातम् मया यदस्य काव्यस्यैका प्रतिः उज्जैननगरस्थसिन्धियापुस्तकालये द्वितीया च बम्बईनगरस्थ रायल एशियाटिकसोसायटीग्रन्थागारे च वरीवर्ति । अस्य हस्तलिखितप्रति-द्वयस्य प्रतिलिपिप्रेषणार्थंतदीयग्रन्थागाराध्यक्षेण सह पत्राचारो विहितो मया । बम्बईनगरस्थपुस्तकालयाऽधिकारिणा प्रतिलिपिप्रेषणेऽसमर्थता प्रकटिता । अतः तत्कृते वारद्वयं षड्वर्षेभ्यः पूर्वं बम्बईनगरस्य यात्रा कृता । तत्रत्यां प्रतिं प्रपठ्य बहुपाठभेदोऽनुभूतो मया । सुस्पष्टपाठनिर्धारणे पाठभेदसंकलनं परमा-वश्यकम् । एतत्कृते प्राचीनहस्तलेखपाठनपटोः कस्याऽपि सहयोगिनः साहाय्य-मपेक्षितम् । तं विना पाठभेदसंकलनमसौविध्यजनकं बहुव्ययसाध्यं बम्बईमहा-नगरे कालक्षेपकारकं च भविष्यतीति विचार्य्य—एतदर्थं तन्नगरस्थमाधवबाग-निवासि सुहृद्वरभिषक्प्रवरपण्डितवासुदेवव्यासमहोदयोऽनुरुद्धः । सहृदयधुरीणेन-तेन मदीयाऽनुरोधं सहर्षं स्वीकृत्य पाठभेदसंकलने महती सहायता संविहिता । उज्जैननगरस्थग्रन्थागारप्रतेः प्रतिलिपिस्तु इन्दौरनगरस्थसंस्कृतमहाविद्यालय-प्राध्यापकेन मित्रवर्य्यडा०श्रीलक्ष्मणनारायणशुक्लमहोदयेन प्रेषिता एतत्कृते विद्वद्धुरीणाभ्यां ताभ्याम् अनेकान् धन्यवादान् विदधामि । हस्त-लिखितप्रतिद्वयप्राप्त्याऽपि यत्र तत्राऽस्पष्टतावशात् सुसम्पादने महत्परिश्रमं विलोक्य सम्पादनजन्यपरिश्रमभिया कृतिरियं मदन्तिके चिरकालं सुरक्षिता-ऽऽसीत् ।

साम्प्रतं मदीयं स्वास्थ्यं 'शरीरं व्याधिमन्दिरमिति' सूक्तिं चरितार्थ-यतीति जानता मया 'क्षणादूर्ध्वंन्न जानामि विधाता किं विधास्यतीतिसूक्तिमपि' विचिन्त्याऽस्य काव्यस्य प्रकाशनं व्यधायि । अस्तु यत्र यत्र काव्ये अस्पष्टतायाः अनुभवः सञ्जातस्तत्र तत्र अत्यन्तसंक्षिप्ता टिप्पणी पाठकानां सौकर्य्याय दत्ता ।

अन्ते अनेकेषां संस्कृतग्रन्थानां पुराणानाञ्च हिन्दीभाषायामनुवादकेन मित्रवरपण्डितप्रवरश्रोतारिणीशझामहोदयेन अस्मिन् कार्ये महती सहायता कृता । अयं जनः स्वजनकल्पः अतः तत्कृते तस्मै धन्यवादप्रदानं केवलं शिष्टाचारमात्रं मन्ये । संगमनोसहसंपादकव्याकरणाचार्यमित्रवरपण्डित-शेषधरद्विवेदिमहोदयेन प्रूफसंशोधने अन्यस्मिन् कार्ये च कृतं साहाय्यं स्मारं स्मारं तस्मा अपि धन्यवादं वितीर्य विरमामीति शम् ।

मकरसंक्रान्तिः १९८७ प्रभात शास्त्री

१—कल्याणः—गंगायमुनयोरन्तराले पत्रपुञ्जस्यराजकुमारो वीरवर-स्यात्मजः शेषकृष्णस्य शिष्यः यदर्थं सप्तदशशताब्दी प्रारम्भे । 'कृष्णेन प्रक्रिया कौमुद्याः' प्रकाशाभिधा टीका व्यलेखि । २—कल्याणः—नन्दलालस्य गुरुः 'योग-शतकस्य' टीकाकर्त्ता । ३—कल्याणः—योगिनीदशाया सुलेखकः । ४—कल्याणः—राजतरङ्गिणीलेखकस्य कल्हणस्य संस्कृतं नाम । ५—कल्याणः—कलिकुण्ड-पार्श्वस्तुतेः कलिकुण्डगीताया वा प्रणेता, जैनः । ६—कल्याणः—गर्भरक्षाविधान-लेखकः ७—कल्याणः—जयदेवकृतगीतगोविन्दस्यानुकरणात्मकस्य गीतगङ्गा-धराभिधद्वादशसर्गात्मकभक्तिकाव्यस्य प्रणेता । ८—कल्याणः—तिथिकल्पद्रुमपु-स्तकप्रणेता । ९—कल्याणः—विरुदा- वल्याः गद्यपद्यसमन्वितसानुप्रासप्रशस्ते-र्लेखकः । १०—कल्याणः—जैनवीरस्तवकस्य लेखकः । ११—कल्याणः—अनु-त्तरत्रिंशिकायाः टीकाकर्त्ता, अभिनवगुप्तेन स्वीये तन्त्रालोके चर्चितः । १२—कल्याणः—जैनोऽयम् १६२९ खिस्ताऽब्दे युगप्रधानस्वरूपस्य टीकां लिलेख । १३—कल्याणः—अग्निष्टोम- प्रयोग—आश्वलायनसूत्रकात्यायनसूत्रपवमानसूत्र पुरुषसूक्तरात्रिसूक्तानां टिप्पणकर्त्ता कल्याणजीति अपरनामकः । १४—कल्याणः—रत्नाकरात्मजरामदासस्य पौत्रः, मन्त्रमहोदधिप्रणेतुः महीधरस्या-त्मजः १८५७ तमखिस्ताब्दे बालतन्त्रं 'बालचिकित्सा' वा पुस्तकं

लिखितवान् । १५—कल्याण उपाध्यायः—अष्टा दशखीस्तीयशताब्द्यां कर्णाटवंशशासकस्य राघवसिंहस्य आश्रितः । काव्यप्रकाशस्य कल्पलताव्याख्या-दुर्गापूजापद्धति-नित्यार्चनविधि-शिवप्रतिष्ठापद्धतीनां लेखकः । एतत्प्रणीतच्छ-न्दांसि विद्याकरसहस्रकेऽपि उद्धृतानि सन्ति । १६—कल्याणऋषिः—मानसा-गरीजन्मपत्रीपद्धतिपुस्तकयोः प्रणेता । १७—कल्याणः—अशौचनिर्णयरचयितुः कानेरीभट्टस्य पिता मेलागिरिआचार्येनामकः जैनविद्वान् । १३—कल्याणकः जैन—अपभ्रंशे पतनग्रन्थलेखकः । १६—कल्याणकर त्रिपाठी—कलिकान्ता-कुतुकप्रणेता, रामकृष्णस्य पिता । २०—कल्याणकविः—१५५६-१६०५ खीस्तीयाब्दाभ्यन्तरे अकबरसामन्तं जयपुराधीशं मानसिंहं समाश्रितः । अयं पुण्डरीकविट्ठलस्य रागमालापुस्तकस्य सुगमरागमालानाम्ना भाषानुवादं चकार । २१—कल्याणदत्तः—वल्लभदेवस्य सुभाषितावल्यामुल्लिखितः । २२—कल्याणभट्टः—नामार्थचन्द्रिकायाः प्रणेता । २३—कल्याणभट्टः—मधुराष्टकप्रणेता ।

●

द्रष्टव्यम्—न्यू केटलागस केटलागारम्—पृष्ठम् २४८ ।

गीतगङ्गाधरम्

कल्याणकविकृतम्

॥ श्रीगणेशाय नमः ॥

मेघाऽऽडम्बरकारिवारिधिमहाऽऽ[1]वर्तानुकारिस्फुर-
च्छत्राकारमधोऽम्बरे त्रिजगतामीशो नरीनृत्यति ।
यस्योच्चै[2]र्जयतीभक्तिविलसद्विष्वग्वितानं मह-
त्पार्वत्याः पुरतः प्रभुः प्रविलसत्तन्मानविध्वंसनः ॥ १

⊙

चेतश्चेच्चतुराननेः [3]मुररिपौ मारान्तकेऽभेदतो,
भक्त्या तद्भजनेऽस्ति भावुकजनाः! कल्याणवाणीमिमाम् ।
[4]शृण्वन्ति प्रतिवासरं भवभयप्रध्वंसिनीं धूर्जटेः,
शृङ्गारादिरसानुवर्णनपरां सद्विद्वदाह्लादिनीम् ॥ २

⊙

यद्यप्यष्टपदीप्रबन्धरचने नाऽन्योऽस्ति कुत्राप्यहो !!
विद्वान् श्रीजयदेवपण्डितकवेस्तत्कीर्तिमाप्नोति यः ।
प्रांशोः पङ्गुरिवाऽनुयामि पदवीमीशानकीर्त्युच्चकै-
र्यष्ट्याऽऽधारबलेन तस्य विदुषां श्रेष्ठैर्दुरापामपि ॥ ३

⊙

यदीशभजने जनाः![5] भवति मानसं भक्तिमत्-
तदीयजनपावनाऽतुलचरित्रसंवर्णने ।

---

१. वर्षा क. । २. जयतीति क. ख. । ३. सुरारिपौ क. । ४. शृण्वन्तु ग. । ५. जनः क. ।

[1]तदामदनुवर्णितं शृणुत सज्जनाः ! शृण्वतां,
मुदावहमिमं शिवाशिवविहारकाव्यं परम् ॥ ४

⊙

जगद्यात्राविधानार्थं, जगदीशावपि स्वयम् ।
[2]लौकिकीमिव यां लीलां, विधत्तस्तामहं ब्रुवे ॥ ५

⊙

शिवयोः शिवदं श्रेष्ठं,[3] पठतां तत्प्रसादतः ।
गीतगङ्गाधरं ग्रन्थं कल्याणश्चकरीत्यमुम् ॥ ६

⊙

[4]मालवगौडीरागेण गीयते

सकलजगद्धरणे धृतवानसि देहम्,
धरणिमयञ्च जनं [5]विविधेऽहम् ।
शङ्कर ! धृतभूमिशरीर ! जय गिरिजाधिपते ! ॥१ ध्रुवपदम्

⊙

विसृजसि जीवकृते जलमयवपुषेदम्,
जीवनमखिलगुणं बहुभेदम् ।
शङ्कर ! धृतजलमयरूप ! जय गिरिजाधिपते ! ॥२

⊙

स्थिरचरजठरगतोऽत्रसि विश्वमशेषम्,
वहसि तदर्थकृते शिखिवेषम् ।
शङ्कर ! धृतवह्निशरीर ! जय गिरिजाधिपते ! ॥३

⊙

---

१. वदा क. । २. लौकिकामिव. ग. । ३. प्रेष्ठं ग. । ४. मालगौडीरागे ख. मालवगोडीरागे ग. । ५. विदधेऽहमित्युचितः । विविधेहम्-इति पाठस्वीकारे विविधा ईहा यस्य सः तम्-इति व्युत्पत्तिः ।

लोकनिकायधृतौ बहिरन्तरतस्त्वम्,
चरसि [1]सततगतिरेव यतस्त्वम् ।
शङ्कर ! धृतपवनशरीर ! जय गिरिजाधिपते ! ॥४

⊙

गगनतनुं मुनयोऽनुदिनं विनयेन,
शुचिमनसा सुसमाधिबलेन ।
शङ्कर ! त्रिदशेश ! भजन्ति जय गिरिजाधिपते ! ॥५

⊙

तरणिकरैरभितोऽखिलजीवनमुर्वीम्,
वहसि करोषि महागुणगुर्वीम् ।
शङ्कर ! धृतदिनकररूप ! जय गिरिजाधिपते ! ॥६

⊙

अमृतमयेन करेण किलौषधिवर्गम्,
वर्धयसीह तथाऽखिलसर्गम् ।
शङ्कर ! धृतशशिमयरूप ! जय गिरिजाधिपते ! ॥७

⊙

दीक्षितजनमनुविश्य [2]जयसि सुरसङ्घम्,
विहिततदीयदुरितभरभङ्गम् ।
शङ्कर ! धृतदीक्षितरूप ! जय गिरिजाधिपते ! ॥८

⊙

सृजसि सरोजभुवा हरिणाऽ[3]वसि लोकम्,
हरसि हरेण पदं गतशोकम् ।
[4]शङ्कर ! धृतनिजजनमीश ! [5]नयसि [6]जयाधिपते ! ॥९

⊙

---

१. सन्तत ग. । २. यजसि, ग. । ३. अवसे ग. । ४. शङ्कराऽऽश्रित ख. । ५. नयति क. ६. ध्रुवपदानुरोधेन 'जय गिरिजाधिपते' इत्युचितः ।

इति कल्याणकृतं सदा शिवकरशिवगीतम्,
वितरतु शं शिवपदमुपनीतम् ।
शङ्कर ! त्रिविधाऽभिधभेद ! जय गिरिजाधिपते ! ॥१०

प्रथमप्रबन्धः

⊙

भूरूपाय जलात्मनेऽग्निवपुषे वातात्मने खात्मने,
सोमायांशुमतेऽधियज्ञवपुषेऽष्टामूर्त्तये व्यापिने ।
ब्रह्माऽधोक्षजरुद्रमूर्तिभिरिमां संसारयात्रां स्वया,
शक्त्या संपरिवर्तकाय महते देवाय तस्मै नमः ॥७

⊙

ब्रह्माण्डोर्ध्वकपालतोबहु[1]हरेः पादाग्रभिन्नात्पतद्-
गङ्गादिव्यवपुर्विलोकनवशादुद्भूतमानामुमाम् ।
वाचो युक्ति[2] विचक्षणालिवचनैः कृत्वाऽनुकूलां गिरौ,
गौरीशङ्करयोर्जयन्ति युतयोस्ता[3] मन्दरे केलयः ॥८

⊙

भवन्तु गौरीशिवयोः शिवप्रदा,
लीलाविलासा ललितालिवाक्यतः ।
विध्वंसितप्रौढतराऽभिमानयोः ,
कुञ्जोदरे मन्दरकन्दरान्तरे ॥९

⊙

प्रभातरागेण गीयते वा[4] रामकरीरागेण गीयते

[5]प्रमथगणप्रतिपालक ! शिखिभालक हे ! ।
भुजगविभूषणनाथ ! जय सुरनाथ ! विभो ! ॥ १ ध्रुवपदम्

⊙

---

१. बटु क. । २. विलक्षणा क. । ३. ताम् ग. । ४. रामगरीरागेण गीयते क. । ५. प्रथम ख. प्रथमगणपति ग. ।

शर[१]विहतत्रिपुरासुर ! निहतासुर हे ! ।
सुरसुखकरण[२] निदान ! [३]जय सुरनाथ ! विभो ! ॥ २

⊙

कृत्तिवसन ! गगनाम्बर ! यमिनां वर हे ! ।
[४]दशकरधरवरदेश ! [५]जय सुरनाथ ! विभो ! ॥३

⊙

नीलकण्ठ ! [६]हर ! शङ्कर ! अभयङ्कर हे ! ।
भूतिविभूषितदेह ! जय[७]सुरनाथ ! विभो ! ॥४

⊙

शशिशेखर ! [८]गिरिजेश्वर ! त्रिदशेश्वर हे ! ।
अन्धकहर ! पशुपाल ! [९]जय सुरनाथ ! विभो ! ॥५

⊙

दक्षमहामखनाशन ! वृषभासन हे ! ।
मृत्युञ्जय ! जयनाथ ! जय [१०]सुरनाथ ! विभो ! ॥६

⊙

नयनदहननिहतस्मर ! हतघस्मर हे ! ।
त्रिनयन ! शूलधरेश ! [११]जय सुरनाथ ! विभो ! ॥७

⊙

इति हरगुणगणमण्डनं [१२]भवखण्डनकम् ।
कल्याणेन कृतं जना दधतु स्फुटकम्[१३] ॥८

[१४]द्वितीयप्रबन्धः

⊙

---

१. निहत ख. ग. २. निधान क. । ३. जय-जय शर्व ख. ग. । ४. दशकन्धर इत्युचितः प्रतीयते । ५. जय सकलेश ख. ग. । ६. शशिशेखर ख. ७. जय-जय शर्व ख. ग. । ८. गिरिशेखर ख. गिरिशेश्वर ग. । ९. जय-जय शर्व ख. ग. । १०. जय-जय शर्व ख. ग. । ११ जय-जय शर्व ख. ग. । १२. भयखण्डनकम् क., भवखण्डकम् ग. १३. अस्मिन् गीते पूर्वत्र 'भवखण्डनम्' उत्तरत्र 'स्फुटनम्' इति पाठः साधीयान् भवेत् । १४. ख. प्रतौ द्वितीयप्रबन्धः' इति नाऽस्ति ।

वामे शूलभृते सुदर्शनभृते दक्षे करे चाम्बरं,
पीतं वारणकृत्तिमुज्ज्वलमथ श्यामं वपुर्बिभ्रते।
शैलाधीशसुताञ्च मां हृदि कलां चान्द्रीञ्च बर्हं तथा,
मौलौ धारयते हराय हरये चैकात्मने ते नमः ॥१०

⊙

[1]रामकरीरागेण गीयते

धवलगिरिराजवर[2]शिखरभवशाखिवरवरवि[3]टपिपुरटमयहर्म्ये ।
निकटतटघटितमणिकान्तिकिर्मीरिते स्थितमनिश[4]मृद्धिमति रम्ये ॥१

⊙

शिवं यामि शरणं भवभ्रमणभयभीतचल[5]चित्त! ध्रुवपदम्

⊙

भूतिकर्पूरसितसुभगतरकायवर भोगिवरभूषणगणेन ।
विमलतरकान्तिधरमिन्दुकरशेखरं सेवितं सुरगणेन ॥२

⊙

शिरसि लसदुग्रभुजगेन्द्र[6]मणिभासुरश्रीजटाजूट[7]सुषमाङ्गम्।
दूरतरपतदमलवारिमन्दाकिनीस्नापितश्रीमदमलाङ्गम् ॥३

⊙

प्रमथपरिपालकं वितथभववारकं दारकं सकलदुरितानाम्।
मदनतनुदाहकं नयनशिखितेजसा धारकं सकलजनतानाम् ॥४

⊙

त्रिपुरहर! दुरितहर! गरलधर! देववर! धरणिधरवरसुताधारी[8] ।
अर्धवपुषि प्रवरसर्पधर! हेतिकर! भव! [9]भवभ्रमणभयहारी ॥५

⊙

---

१. रामग्री रागेण क., रामकरीरागे ख. ग.। २. शिखरभर ख.। ३. विटपिपुरामय-हर्म्ये क.। ४. वृद्धि क. ५. चित्तः क.। ६. मणिता ख.। ७. सुषुमाङ्गम् ख.। ८. वरसुताधीश क. व सुताधारा ग.। ९. भव भवभ्रमण क.।

धवलवृषभध्वजं[1] शूलशोभितकरं सुखकरं सततसुखसेवम् ।
शिवकरं[2] शीतकरकरनिकरविमलतरशेखरं भजत भवदेवम् ॥६

⊙

विमलमणिवेदिकापूतचर्माम्बरस्फुरदमलविपुलकटिभागम् ।
रक्तयुतकुम्भिवरकृत्तिकृत[3]शेखरच्छायमुपवीतवरनागम् ॥७

⊙

भजत भजताऽऽशु भवभीतभावुकजनाः! शङ्करं कृतसुकृतसारम् ।
भारमपनेतुमुरुदुष्कृतारूढ[4]मतिगूढ दुर्ज्ञेयपरपारम् ॥८

⊙

इति परमपावनं [5]जयतु पुरवैरिणः कीर्तनं कलिकलुषनाशम् ।
सपदि विदधातु कल्याणकृतमन्वहं सेविनां [6]सततफलिताशम् ॥९

तृतीयप्रबन्धः

⊙

कदाचित्कैलाशे कमलनयना प्रेमकलहं,
विधायैकान्तेऽन्यत्कटकमगमत्कोपकलुषा ।
[7]कपर्देऽन्यां कान्तां तुहिनगिरिकन्या स्मररिपो-
र्विलोक्यैतेनोच्चैरकपटसखीभ्यामनुगता ॥११

⊙

तदा हरस्तद्गुणहृद्विसोढुम[8]सक्त आरादभिवर्त[9]मानम् ।
आलीं स्वकीयामनुनेतुमुच्चैरुवाच गौरीमधुनेति याहि ॥१२

⊙

सदाशिवेन प्रहिताऽतिदक्षा, सखी सखीभ्यां सहितां भवानीम् ।
एकान्तसंस्थां स्मर[10]शत्रुणेत्थं, संदिष्टमाह स्व[11] वचोऽनुकूलम् ॥१३

⊙

---

१. वृषकध्वजं क. वृषभध्वज ख. ग. २. शीतकरनिकर क. । ३. शेखरच्छायाम् क. । ४. इति गूढ़ ग. । ५. जयति ख. ग. । ६. फलिताशाम् क. ख. । ७. कन्दर्पे क. । ८. असक्तम् क. । ९. मानामित्युचितः । १०. शत्रुणोक्तं ग. । ११. स्म क. ।

गुर्जरीरागेण[1] गीयते

सितगिरिशिखरे पिकरवमुखरे [2]शशिधरशेखरदेवम् ।
सुरतरुशोभित[3]सुषमालोभितपल्लव[4]तलकृतसेवम् ॥१

⊙

[5]भज शिवमधुना सुन्दरि ! [6]मृदुना मद्वचसा धृतगङ्गम्[7] ।
मद्वचनस्य तवैव हितस्य हि सुन्दरि ! मा कुरु भङ्गम् ॥ ध्रुवपदम्

⊙

हरमनुकूलं विमलदुकूलं भज परिधेहि विषादम् ।
मा कुरु[8] मानिनि ! मानिनि शूलिनि मुञ्च हठादवसादम् ॥२

⊙

त्वयि धृतमनसं न कुरु विमनसं मृडमुपसादितखेदम् ।
त्वयि धृतलोभं परिहृतशोभं मम वचनं त्यज नेदम् ॥३

⊙

[9]विलसति गङ्गा विमलतरङ्गा शिरसि हरस्य न नारी ।
त्वयि धृतचेता जातु विचेताः परसुदृशा न विहारी ॥४

⊙

[10]विसृजितदेहं ते [11]विविधेऽहं त्वद्विरहादविलासम् ।
भज भज शम्भुं परिहर दम्भं कुरु कुरु मानविनाशम् ॥५

⊙

परिजनवचनं कुरु हरभजनं कुरु कुररीमिव दीनाम् ।
मामवलोकय तं परितोषय पोषय तनुमिह लीनाम् ॥६

⊙

परिहर कोपं रचय न शोकं मारहरे हरदेहे ।
परसुदृशं[12] मयि कुरु सदृशं परिलोकय सुवर्णसुदेहे ॥७

⊙

---

१. गुर्जरीरागे ख. ग. । २. शशि क. शशधर ख. ग. । ३. सुषुमा ख. ग० । ४. ताल ख० ग० । ५. भजसि ग० । ६. मृदुरा ख ग० । ७. गङ्गा ग० । ८. मानिनि क पुस्तके नास्ति । ९. विलपति क० । १०. विसृजसि क० । ११. विविधा ईहा यस्मिन् सः तम् । देहशब्दस्य विशेषणीभूतोऽयं शब्दः । १२. पारसुदृशमपि ग० ।

इति गिरिजाया जयति जयाया निकटगताया वाणी ।
विष्णुजभणिता शिव[1]सखिगणिता मानिनिशातकृपाणी ॥८

चतुर्थप्रबन्धः

⊙

इत्थं वाचमुदीर्य सा गिरिसुतां देवीं प्रियां धूर्जटे-
र्दूती देवमियाय चानुगुणया वाण्या[2]ऽधिकान्तक्रुधम् ।
पार्वत्या विरहेण दीनमनसं तत्सङ्गमाकाङ्क्षिणं[3],
प्राहाऽनागमनादनङ्गदमनं निर्भर्त्सि[4]तैतत्पुरः ॥१४

मेघरागेण गीयते

सा सदाशिव ! युक्तिभिः प्रतिबोधिताऽस्ति मयाऽपि ।
नैव मुञ्चति मध्यमानमुमा वियोगभियाऽपि ॥१

⊙

शिव ! शिव[5]गताऽऽदरतया गता साऽनुशयेन । ध्रुवपदम्

⊙

[6]तत्प्रसीद परेश ! तामनुनेतुमेहि परेण ।
मानिनीमनुकूलनायक ! तत्स्वयं विनयेन ॥२

⊙

सा मयाऽपि न चान्ययाऽपि न शक्यतेऽनुनयेन ।
नाऽस्ति कोऽपि स योग ईदृश एति सा किल येन ॥३

⊙

या भवन्तमिता परेण ममाधियोगबलेन ।
[7]तामपास्य न शोभसे शिव ! चेतसाऽतिचलेन ॥४

⊙

---

१. सखिगणि क० । २. अधिकान्तं ग० । ३. आकाङ्क्षकम् क० । ४. तैतत् ख० ग० । ५. नतादर क० । ६. तत्र सीद ख० ग० । ७. अयास्य ख० ग० ।

या जहौ जनकं भवत्यनवस्थितं जगदीशे ।
आत्मना सह पूर्वजन्मनि तां भवान्न समीशे[१] ॥५

⊙

किं वदामि वचो भवत्पुरतो यतोऽनुरताय ।
नायकाय यदुच्यते तदवश्यमेव सुखाय ॥ ६

⊙

तत्कथं वचनं भवाननुमन्यते न गुणाय ।
तां वचो मम मन्मथान्तक ! योजयाऽऽशु सुखाय ॥ ७

⊙

एवमेतदुमानुकूलनवर्णनं सुखदायि ।
विष्णुसम्भवकेन [२]यन्निरयापहं निरमायि ॥ ८

पञ्चमप्रबन्धः

⊙

इतीरयित्वा विरराम दूती,
यदा तदा तद्विरहाकुलात्मा ।
पुनर्नुनोद प्रतिगच्छ भद्रे !,
संदिश्य दैन्यं मम वर्णयेति ॥ १५

⊙

सा पुनरपि हरवाक्यं,
यदपि न शक्यं तदन्यथा कर्तुम् ।
अगमद् गिरिजानिकटं,
यद्यपि विकटं तथाऽपि तत्कृत्यम् ॥ १६

⊙

---

१. समीष्टे इत्युचितः गीते अन्त्यानुप्रासेनैव सौन्दर्यं समायाति । अतः कविनाऽत्र अनुप्रासस्य लोभेन भूपः कूपे निपातित इत्युक्तिश्चरितार्थीकृता । २. नरकापहम् ख० ।

दाता योऽस्ति दिगम्बरोऽपि हि नृणां दिव्याम्बराणां श्रितो,
भूत्यङ्गोऽपि विभूतिदः स्मरारिपुश्चार्धाङ्गदारोऽपि यः ।
कैलाशस्थितिदः स्मशाननिलयोऽपीशोऽपि भिक्षाशनो,
वृद्धोक्षोऽपि गतौ विमानगतिदः शम्भुः शिवायाऽस्तु वः ॥ १७

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
शिवानुनयो नाम
प्रथमः सर्गः ।

अथ द्वितीयः सर्गः

शिवदूती शिवावस्थां, शिवाऽग्रे शिवनोदिता ।
श्रावयित्वा शिवायास्या अवस्थां पुनरब्रवीत् ॥ १

⊙

[1]गुर्जरीरागेण गीयते

क्षितिधरराज[2]सुते ! विरहेण तवाऽति कृशः स्मरहन्ता ।
[3]गलगरलं विरलं परिदहति तदङ्गमतस्त्वयि रन्ता ॥ १

⊙

गिरिजे ! मा गिरिशे कुरु मानम् । ध्रुवपदम्

⊙

देहि कृशोदरि ! मद्वचनं प्रतिवाचमुदारचरित्रे ! ।
[4]इति विलपति स भृशं भवतीमुपधाय मनसि सुपवित्रे ॥ २

⊙

[5]गलगरलेन शिरसि शशिना च तनौ सितभूतिभरेण ।
शम्भुरयं भवतीति भवानि ! विभाति भवोऽतिचिरेण ॥ ३

⊙

अविरलभालनयनशिखिशोषितकुसुमविशिखरिपुरीशम् ।
तुदति भृशं[6] विवशं[7] त्रिदधातु [8]तवाभिगमाद् भवतीशम् ॥ ४

⊙

तव विरहानलशोषितशैवकलेवरभेषजमेकम् ।
जयति हि सम्प्रति सुभगकपर्दकजह्नुसुताजलसेकम् ॥ ५

⊙

पशुपतिमुकुटसुशोभिसुधाधर[9]विगलिततदमृतधारा ।
श्वसितसमीरणसङ्गतिसञ्चलिता सुखयति तमुदारा ॥ ६

⊙

---

१. गुर्जरी रागे ख० ग० । २. सुता क० । ३. गर क० । ४. ख. ग प्रतौ द्वितीया पंक्तिर्नास्ति । ५. गर क० । ६. विविशम् ख० ग० ! ७. विदधाति क० । ८. वाभिगमाद् क० । ९. सुधां धर ग० ।

मम वचसा भवतीमवगत्य समीपगतामिव तल्पम् ।
रचयति कोमलपुष्पमयं [1]समुपैति च हर्षमनल्पम् ॥ ७

⊙

इति गिरिजापुरतः परिवर्णितमखिलजगत्प्रभुली[2]लम् ।
कल्याणेन च दूतिकया जयतीह समीहितशीलम्[3] ॥ ८

षष्ठप्रबन्धः

⊙

उरङ्गानङ्गेभ्यो वियति गजकृत्तिं वितनुते,
वितानं विन्यस्य स्मरति भवतीं स स्मररिपुः ।
तदेहि त्वं बाले ! तव विरहविक्लान्तमधुना,
समागत्याऽपर्णे ! [4]सुखय सखि ! शर्वं शशिमुखि[5] ! ॥ २

⊙

केदाररागेण गीयते

शशिमुखि ! गर्वं मा कुरु शर्वं सुखय शुभागमनेन ।
सफलय रुचिरं वपुरपि सुचिरं विनयबलद्वचनेन ॥ १

⊙

मुग्धे ! मा परिहर हरमधुना । ध्रुवपदम्

⊙

स्मरभयहरणं स्मरहरवरणं[6] समधिगतं बहुतपसा ।
मम गिरितनये ! किमिति न विनये ! मतिमपि वितरसि मनसा ॥ २

⊙

शृणु मम वचनं कुरु तनुरचनं भूषय भूषणभासा ।
शुभतममङ्गं कुरु हरसङ्गं भव[7] भवभूरिविलासा ॥ ३

⊙

इह भुवि धन्या गिरवरकन्या याऽलभतार्धहराङ्गम् ।
इति तव यशसा जगदति महसा[8] जयति तदेतु तवाङ्गम् ॥ ४

⊙

---

१. स्वम् ग । २. लीलाम् क० । ३. शीलाम् क० । ४. सुखयति क० । ५. मुखे क० । ६. चरणं ग० । ७. भव भय क. भव भव ख० । ८. नयति क० ।

मय्यनुकूला विमलदुकूला भव भवती गिरिकन्ये ! ।
न [1]भजति वचनं बहुविधरचनं विफलमिदं खलु मन्ये ॥ ५

⊙

[2]अति मृदुचित्तं विरहविचित्रं तव वचसा प्रतियानम् ।
मम सखि ! परुषे ! किमिति न कुरुषे रक्ष शिवे ! मम मानम् ॥६

⊙

[3]भव भवभवनं पृष्ठगपवनं कलय शिवं प्रति याने ! ।
[4]उद्यमयुक्ता भवसि नियुक्ता किमु न मया गुरुमाने ! ॥ ७

⊙

इति सखिवचनं बहुविधरचनं वर्णितमुदितगिरित्रम् ।
जयतु विजयदं बहुविधसुखदं कल्याणेन पवित्रम् ॥ ८

सप्तमप्रबन्धः

⊙

इतीरितं दूतिकयाऽप्यपर्णा, कर्णाप्तवाक्यं नवहेमवर्णा ।
बभूव तूष्णीमथ तामुवाच, प्रोद्दीपयन् मानसमेतदीयम् ॥ ३

⊙

रम्ये[5] गिरीन्द्रोपवने वसन्तं, शिवं रहस्यतुर्पतिं वसन्तम् ।
विनोमया तां च तथा वसन्तीमुमामवोचन्निकटे [6]वसन्ती ॥ ४

वसन्तरागेण गीयते

विचकिल[7] विविधलताललितालिकुलाकुलतरुततिकुञ्जम् ।
अरुणरसालमधुपयुतकिसलयदलपरितर्ज्जितगुञ्जम् ॥ १

⊙

मानिनि ! दिशि दिशि पश्य वसन्तम् ।
त्वामिव कुसुममिषेण हसन्तम् ॥ ध्रुवपदम्

⊙

---

१. मिजति ग० । २. इति क० । ३. भव भवनम् क० । ४. नुद्यमयुक्ता क० । ५. गिरिशे पवने ग० । ६. वसन्तीम् क० । ७. विचकिल रसाल इति अधिकः पाठः ख० ।

मृदुतरपरिमलयुतमलयानिलकम्पितकिसलय[1]शोभम् ।
संयमिनामपि मन्थरगामिनि ! जनितमनोभवलोभम्[2] ॥ २

⊙

परिमलमिलदलिसंकुलकलिकाकलितरसाल[3]रसालम् ।
पश्य वनं निविडं परिफुल्लितदिव्यलता[4]तरुजालम् ॥ ३

⊙

सकलसुगन्धिकुसुममधुमत्तमधुव्रतकुलकलरावम् ।
जनयति मनसि समाधिमतामपि सुन्दरि ! मनसिजभावम् ॥ ४

⊙

कोकिलकलरवकलितलताललितं बहुतालतमालम् ।
मालतिकेतकिजातिलता[5]सुषमा[6]सुभगं सुविशालम् ॥ ५

⊙

दिशि दिशि कुसुमितकिंशुककुड्मलवृन्दविजृम्भित[7]भृङ्गम् ।
वनमनङ्गनृपरचितशिविरमिव शोणलस[8]त्पटतुङ्गम् ॥ ६

⊙

अनुभव सखि ! नवदोलमहोत्सवमङ्कगता शशिमौलेः ।
अलिकुलकोकिलकलरवकिन्नरगीत[9]मनुकलय शैले ॥ ७

⊙

इति सखिवचनमुमामनुनयपरमृतुपतिवर्णनसारम् ।
कल्याणेन जयतु कथितं शमिताऽखिलमानमुदारम् ॥ ८

अष्टमप्रबन्धः

⊙

---

१. शोभाम् क० ग० । २. लोभाम् क० ग० । ३. रसालाम् क० । ४. तरुजालाम् क० । ५. सुषुमा ख० ग० । ६. सुभरगं ग० । ७. शृङ्गम् क० ख० ग० । ८. पद ख० ग० । ९. अनु-कूलय क० अनुकल ग० ।

आरूढं मलयाद्रिमत्तकरिणं मन्दानिलान्दोलितो--
न्मत्तालिव्रज[1]सुन्दरीरवलतासच्चामरैर्वीजितम् ।
वातोद्धूतपरागपुञ्जविलसच्छत्रं वसन्तं नृपम्,
तत्पुष्पैस्तवपाणिपल्लवगतैर्मानोर्जिता [2]मानय ॥ ५

⊙

मानं विमुच्य सखि ! [3]माररिपुं भजस्व,
मा मद्वचोऽवगणयाऽगणितैर्गुणैस्त्वम् ।
युक्ताऽसि मानिनि ! भजस्व भवाङ्कशय्यां,
भव्ये शिवे भव शिवे ! शिवदेऽनुकूला ॥ ६

⊙

[4]वामाङ्गे गिरिजा गले च गरलं मौलौ च मन्दाकिनी,
भाले वह्निरनङ्गदेहदहनश्चन्द्रः किरीट[5]स्थितः ।
सर्पाः [6]शर्ववपुर्विभूषणपदे यस्याम्बरञ्चाम्बरं
चित्रैःसर्वविलक्षणाय चरितैस्तस्मै नमः शम्भवे ॥ ७

⊙

इति श्रीगीतगङ्गाधराभिधाने
[7]महाकाव्ये कल्याणकृते
शिवाऽनुकूलनवसन्त-
वर्णनं [8]नाम
द्वितीयः सर्गः ।

●

---

१. सुन्दरा ख० ग० । २. मानया ख० ग० । ३. स्मर क० । ४. वामाङ्के क० । ५. स्थितिः ख० ग० । ६. सर्व क० ख० ग० । ७. ख प्रतौ 'महाकाव्ये' नास्ति । ८. वर्णने ख० ग० ।

अथ तृतीयः सर्गः

श्रुत्वा [1]शर्वसखीवचः शिवतमं शर्वविमानाच्छिवं,
[2]शर्वाणी न शशाक शंसितुमपि प्राक् ताम् प्रति प्रोज्झितुम् ।
गन्तुं [3]चापि मनोगतं गुरुतरं मानं पुनर्मानिनो,
स्वाभिप्रायमवीवदच्छिववधू दूती ततः शाम्भवी ॥ १

⊙

[4]रामकरीरागेण गीयते

विश्वमयमेतदगुणोऽपि भगवद्गुणानुदयपरिपालनविनाशे ।
स हि समनुगृह्य विदधाति विविधात्मतामभिलषति यर्हि सुभगाशे ॥ १

⊙

शिवं [5]याहि शक्रादिसंसेवितं सेवितुं सर्वदा सर्वदातारम् । ध्रुवपदम्

⊙

स हि सकलजगदवनकृद् भवं [6]कृदन्तकृत्कालकर्मादिकृदनादिः ।
कर्तुकामः प्रकृतिविस्तरं स्वात्मना [7]नामगुणकर्मविभवादिः ॥ २

⊙

त्वां तदा [8]वीक्ष्यते विश्वपतिरेष विश्वेश्वरो विश्वविस्तारे ।
कारणीभूतधवलारुणश्यामगुणधारिणीममलतरहारे ! ॥ ३

⊙

त्वं सृजसि पासि संहरसि हि तदीक्षया क्षुभितभूगुणविहितविस्तारा ।
संविधातुं किमपि तद्दते न क्षमा तत्कृपातोऽधिगतसारा ॥ ४

⊙

तत्प्रसीद प्रकृतिमेहि खलु पूर्विकामन्यथा सपदि जगदीशः ।
विमलतर[9]मात्मनो धाम यदि यास्यति द्रष्टुमपि कोऽपि भवतीशः ॥५

⊙

---

१. सर्वं क० । २. शर्वाणा ग० । ३. त्वापि क० । ४. रामगरी क० । ५. पाहि क० । ६. कृदन्तभक्रत क० । ७. नास गुण क० । ८. 'वीक्ष्यते' इति प्रयोगोऽपि भवति । किन्त्वत्र प्रकरणदृष्ट्या 'वीक्षते' इत्युचितः । ९. आत्मबोधाय क० ।

तदलमतिमानमलिनेन तव चेतसा वेधसा नो विदितपारम् ।
[1]अयि ! गिरिशमनुसरतु भवती सुखं वपुषि तव कृतसुकृतसारम् ॥ ६

⊙

रचय सुभगं शिवे ! सुभगबहुभूषणैरङ्गमिदमखिलसुषमायाः ।
भाजनं भावय[2] भवं भव भवप्रिया भवशिरसि भवसुभगतायाः[3] ॥ ७

⊙

विश्वजननी हि भवती[4] भवति भामिनि[5] ! त्वत्पतिः सकलजनतायाः ।
भवति जनकश्च भवतोर्भवतु सङ्गतिर्मानपदमद्य मायायाः ॥ ८

⊙

इति दुरितहारिहरचरितकृतवर्णनं शमितगिरिजावितततमानम् ।
शिवसमनुकूलदूतीसमुपवर्णितं जयति कल्याणकृतगानम् ॥ ९

नवमप्रबन्धः

⊙

विश्वं यर्हि सिसृक्षते स्वयमसौ त्वामीक्षते[6] तद्बलात्,
त्वं सर्वं विदधासि दृश्यरहितो [7]द्रष्टा यदा पूरुषः ।
स्वानन्दैक[8]सुखोऽन्यदा स भविता चेदेवमद्यापि तत्,
त्वन्तेऽपि प्रकृतिस्तथैव सुमुखि ! प्रीताऽनुकूला भव ॥ २

⊙

इति तद्वचनं निशम्य बाला,
न [9]चचालाऽचलसानुतो विशालात् ।
[10]अचलाधिपतेः सुताऽऽत्मचित्ता,
[11]न बलात् सा हि जहौ निजात्ममानम् ॥३

⊙


---

१. अपि ख० ग० । २. भावयन्नवं क० । ३. सुभगायाः क० । ४. भवति क० । ५. भामिनी क० ग० । ६. ईक्ष्यते ग० । ७. दृष्ट्वा क० दृष्टा ग० । ८. सुखोत्पदा ग० ९. चचालोल क०, चचालोचल ग० । १०. च्यबलाधिपतेः क० अचधिपतेः ग० । ११. नवलाशा ग० ।

दिव्यक्षौमधरोऽपि कृत्तिवसनो निष्कोल्लसत्कण्ठभृत्,
चञ्चद्दुःसहकालकूटगरलोऽप्यङ्घ्र्युल्लसन्नूपुरः ।
अप्याशीविषभूषणस्त्रिनयनोऽप्येकेक्षणोऽपीक्षणाद्-,
दग्धानङ्गकलेवरोऽवतु रसादर्धाङ्गदारो हरः ॥ ४

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
विभीषिकाप्रदर्शनो नाम
तृतीयः सर्गः ।



अथ चतुर्थः सर्गः

तामथ तूष्णीभूतां, भूताधिपतेः प्रियां प्रिया साऽऽलिः ।
सुन्दरमन्दिरशोभायुक्त्या करोति स्म[1] सोत्कण्ठाम् ॥१

⊙

गुर्जरीरागेण[2] गीयते

धवल[3]शिखरिवरधवलधवल[4]तरविपुलशिलाकमनीये ।
सुरतरुराजतले भवने मणिमयरचनारमणीये ॥ १

⊙

कुरु रतिमिह रतिपतिसुखमनुभव भवपतिना नगकन्ये ! ध्रुवपदम्

⊙

[5]स्फटिकशिलाशकलाऽऽकलिताऽमलविपुलशालशुचिशोभा ।
क्वचिदपि यत्र जयति न जगत्त्रयसद्भवनेष्वपि [6]नो भा ॥ २

⊙

कनकमयाङ्गणभूमिकलित[7]ललितामलमणिमयचित्रम् ।
जनयति विस्मयमीक्षणसङ्गतसिद्धगणस्य विचित्रम् ॥ ३

⊙

यत्र महामरकतमणिमण्डितभित्तितलस्फुरितानि ।
यत्र जयन्ति कलापिकलापकला[8]नर्तनचरितानि ॥ ४

⊙

रत्ननिकरविरचितवातायनवरवनितावदनानि ।
मूर्त्तानीव जयन्ति यत्र[9] कमलानि रमासदनानि ॥ ५

⊙

---

१. स क० । २. गुर्जरीरागे ख० ग० । ३. शिखिवर क०, शिशरिवर ग० । ४. वर क० । ५. स्फुटिक ख० ग० । ६. शोभा क० । ७. ललितामणिमयचित्रम् ग० । ८. भर्तन ग० । ९. पत्र ग० ।

[1]पद्मरागगारुडहरिनोलकपाट[2]विटङ्कविताने ।
मणिमयतोरणतल्पवरासनकिन्नर[3]सुरकृतगाने ॥ ६

⊙

[4]सखि ! भज मद्वचसा विहिते भवदर्थमनङ्गदमेन ।
तं करुणालयमनुभव सौभगमद्य समागमनेन ॥ ७

⊙

इति भवभवनमुमागमनोत्सुकभवमुपवर्णनरम्यम् ।
जयति जगति कल्याणजयप्रदमीश्वरभक्तसुगम्यम् ॥ ८

दशमप्रबन्धः

⊙

इत्थं रम्यं हर्म्यमारादपर्णा, कर्णोद्गीतं स्फीतमा[5] प्ताऽऽप्तसख्या ।
आसीन्मुक्तप्रौढमानाभिमानमुत्कायां तं चाऽऽ[6]चकाङ्क्षात्मकान्तम् ॥२

⊙

ज्ञात्वा हार्दं चेङ्गितज्ञाऽऽत्मदूती, प्राप्ता शर्वं पर्वतेन्द्रप्रतिष्ठम् ।
प्राप्तप्रायामद्रिजां मन्यमानं, मानम्मुक्त्वा स्माह चामुं पुनः सा ॥ ३

⊙

[7]देशाखरागेण गीयते

स्मरहर ! सा कलयति भगवन्तम् ।
स्वयमुपगतमिव[8] तत्र [9]भवन्तम् ॥ १

⊙

शिव शिव साऽभिलषति हि भवन्तम्[10] । ध्रुवपदम्

⊙

[11]किशलयपुष्पदलै[12]रपि मृदुलम् ।
रचयति साऽऽसनमतिशयचटुलम् ॥ २

⊙

---

१. पद्मरा क० । २. विटङ्कि ख० । ३. सुकृत क० । ४. सखी क० । ५. आ कृतिम ख० ग० । ६. वाचकाङ्क्ष क० । ७. देशाखरागेण क० देशाखे ख० ग० । ८. इति ख० ग० । ९. भावन्तम् क० । १०. भावन्तम् क० । ११. किशिलय ग० । १२. रति क० ग० ।

स्वीयकलेवरमतिशयशोभम् ।
सा विदधाति भवति बहुलोभम् ॥ ३

⊙

पृच्छति सहचरिवर्गमनल्पम् ।
कथयतु काऽपि हरेति सुजल्पम् ॥ ४

⊙

भवदभिमुखम[1]नुकलयति नयनम् ।
न भजति संनिहितं किल शयनम् ॥ ५

⊙

शुकमनुपृच्छति वारं वारम् ।
शंस शुकागतमहिवरहारम् ॥ ६

⊙

अपचिततः शंसति [2]सुखवर्गम् ।
[3]पूजयामि यततोऽति हि भर्गम्[4] ॥ ७

⊙

इति [5]शंसितशशिशेखरसुखकरवचनम् ।
सुखयतु विष्णुतनयकृतरचनम् ॥ ८

एकादशप्रबन्धः

⊙

शम्भुः शं मयि धास्यति प्रियवचो वक्ष्यत्यनन्तं सुखं,
दास्यत्यागमनेन दर्शनभवं दूरीकरिष्यत्यदः ।
दुःखं तद्विरहोद्भवं गिरिवरे साकं मया रंस्यते,
सौत्सुक्यादिति सन्मनोरथशतैः कालं नयत्यद्रिजा ॥ ४

⊙

---

१. अनुकूल क० । २. सुरगर्वे क० । ३. पूजयानि ख० । ४. कामा क० । ५. शंसि क०; ख० ग० पुस्तकयोस्तु किमपि न विद्यते ।

तदेहि तां तत्र तदन्तरात्मा ताम्यत्यनन्तं भजते नु तापम् ।
न काऽपि दृष्टा स्वयमागमेन प्रियं प्रयाति प्रतिपन्न[1]माना ॥ ५

⊙

[2]वसन्तरागेण गीयते

मद्वचसा न भजिष्यसि चैनाम् ।
सा जननीमभियास्यति मेनाम् ॥ १

⊙

शिव शिव साऽपि हि मानवती । ध्रुवपदम्

⊙

[3]गुणरहिताऽपि गुणत्रययुक्ता ।
सृजति जगत् भवता विनियुक्ता ॥ २

⊙

तदितरवत् कलयतु [4]मा वामाम् ।
तामनुसर हर ! भवति सकामाम् ॥ ३

⊙

भवदनुकूलतया जगतः शम् ।
तद्भवदेव ! [5]भवति तदवश्यम् ॥ ४

⊙

सा सततं भवतु त्वयि युक्ता ।
त्वत्त्यक्ताऽपि न भवति वियुक्ता ॥ ५

⊙

रसजलयोरिव नास्ति हि भेदः ।
[6]तद्भवतो[7]व्र्यपगच्छतु [8]खेदः ॥ ६

⊙

---

१. कामा क० । २. वसन्तरागे ख० ग० । ३. गुणरहितोऽपि हि क० ग० । ४. कप्रतौ मा इति नास्ति । ५. जगति क० । ६. त्वद् ख० । ७. व्यय ग० । ८. भेदः ग० ।

शब्दार्थाविव वां संयुक्तौ ।
वां भवतान्न कदाऽपि वियुक्तौ ॥ ७

⊙

इति कल्याणभणितसखिवचनम् ।
जयतु हरं प्रति हरगुणरचनम् ॥ ८

[1]द्वादशप्रबन्धः

⊙

वागर्थाविव सङ्गतौ वसुमतीगन्धाविवाम्भोरसौ,
विद्युद्वारिधराविवेव पवनस्पर्शाविव स्तां हि वाम् ।
[2]आकृत्वादरगम्यताम् पशुपते ! मद्वाक्यमेतत्स्वतः,
प्रामाण्यादथ सा हि तत्र भवता गत्वैव सम्भाव्यताम् ॥ ६

⊙

सा स्वीयासु पराऽनुकूलपुरुषेष्वाद्यो भवान्हेतुना,
[3]वां केनाऽपि हि विप्रयोगविधुरौ जातौ न युक्तं हि तत् ।
तत्संयोगरसेश्वरानुभवनेनानन्दयोमां विभो !,
तत्रागत्य धुरि स्थितां प्रियतमां प्रेष्ठप्रियानां प्रभो ! ॥ ७

⊙

पार्वत्याः प्रतिमां पुरःप्रविलसत्पद्मानना पाणिना-
ऽऽलिख्य प्रक्षरदम्बुना प्रणमति प्राप्तैव यावत् सखी ।
पार्वत्याः प्रहिता हि तावदभितः पश्यन् पुनस्ताण्डव-
व्याजाद् भूतिभरेण तां [4]सुविहितांकुर्वन् हरः पातु माम् ॥ ८

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
सोत्कण्ठशिवो नाम
चतुर्थः सर्गः ।

●

---

१. ग प्रतौ न विद्यतेऽयंपाठः । २. पाठः स्यात् । अ कृत्वादव ग० आं कृत्वा दर गम्यताम् इत्युचितः । ३. वामपि ख० । ४. सुपिहितां ग० ।

अथ पञ्चमः सर्गः

अथ दूतिकयोदितं वचः, श्रुतवान् शम्भुरवोचदुत्सुकाम् ।
इति तामनुनीय मानिनीमनुनेतुं निपुणाऽसि [1]चानय ॥ १

⊙

इति हरवचनं निशम्य दूतो त्वरितमियाय सकाशमम्बिकायाः ।
स्मरहरपदवीं निभालयन्त्याः पुरतः[2] इति स्म[3] वदत्युदन्तमैशम् ॥ २

⊙

[4]रामकरीरागेण गीयते

नयनदहनशिखया सशरासन ! शोषितमनसिजविग्रहम् ।
विसृजसि किमिति पुरा तपसि स्थितमपि खलजनकृतनिग्रहम् ॥ १

⊙

शिव शिव शिवं मा परिहर स्मररिपुमुत्सुकं भवदीक्षणे ।
[5]मा विलम्बनमाचर त्वरयाऽचलेश्वरवीक्षणे ॥ ध्रुवपदम्

⊙

तत्र वपुरमलतरं तरलायतनयनयुगेऽयुगलोचनम् ।
सेवितुमलमलसेक्षणि[6] ! मा क्षणमपि कुरु सखिजनशोचनम् ॥ २

⊙

कति कतिवारमनघचरिते ! चरितं [7]चतुरचतुरोचितम् ।
हर पुरतः परिवर्णितमालिजनस्य हि ते करुणोचितम् ॥ ३

⊙

---

१. आनया ख० ग० । २. इती ख० ग० । ३. वदन्तमुदन्तय क० । ४. रामगरीरागे क० रामगरीरागेण ख० । ५. इयं पङ्क्तिः ख० ग० पुस्तकयोर्न विद्यते । ६. सेक्षिणि ख० सोक्षिणि ग० । ७. चतुरेचतुरोचितुम् क० ।

चरणकमलयुगलस्य परागरजःकणमपि [1]शमघापहम् ।
दधति शिरसि शतमन्युमुखादिति दनुयुतजनितभयापहम् ॥ ४

⊙

स्थिरचरसकलजगत्परिपालकतत्पशुपतिपदसेवने ।
किमिति विलम्बनमातनुषे तनु खेदमिमं जहि शोभने ! ॥ ५

⊙

धृष्टशठादिकनायकवद् भवती भवमतिसुखदं प्रभुम् ।
[2]कलयतु मा कलयत्वनुकूलसुदक्षणमुकुटमणि[3]प्रभम् ॥ ६

⊙

यस्य न मानसमभिनवसुरव[4]रनरवर नास्ति [5]सुद्दशमपि क्षणम् ।
कलयति कलरववादिनि ! [6]वादध्वनिभवदभिनवपदवीक्षणम् ॥ ७

⊙

इति कल्याणकरेश्वरकीर्तनयुतसखिवचनमनारतम् ।
बहु कल्याणकरं भवतु क्षितिराजसुताघटनारतम् ॥ ८

त्रयोदशप्रबन्धः

⊙

मुग्धे ! मन्मथदारणं त्रिगजगतां यः कारणं धारणं,
स्वर्धुन्याः सुखकारणं स्तुतिकृतां सद्यो विपद्दारणम् ।
अर्हस्यद्य हि मन्दराचलदरीरम्ये [7]विहाराऽजिरे,
द्रष्टुं चार्द्धवपुः प्रियेण वसता दत्तं[8] प्रियायै क्वचित् ॥ ३

⊙

----

१. शमयापहम् क० शरमघापहम् ख० । २. कलय उ ख० । ३. प्रभुम् क० । ४. नरवर नास्ति ख० ग० । नरवर नास्ति इति न विद्यते ग० । ५. सुदश ग० सद्दश इति उचितः प्रतीयते । ६. वाद्ध्वनि ग० । ७. विहाजिरे ग० । ८. दन्तप्रियैः क० ।

नित्यं नन्दनचन्दनद्रुमलसत्पुष्पैः सदा पूजितम्,
शक्राद्यैः सुरवर्यमौलिमणिभिर्नीराजितं [1]राजितम् ।
हृत्पद्मेषु सतामनारतमगाधीशात्मजाऽऽराधितं,
श्रीकण्ठस्य पदारविन्दयुगलं सर्वार्थदं पातु [2]नः ॥ ४

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
पार्वतीप्रसादनो नाम
पञ्चमः सर्गः ।

---

१. राजितम् नास्ति ग० । २. मः ग० ।

अथ षष्ठः सर्गः

इति सदाशिव[1]सङ्गमनोत्सुकाऽभ्यगमदेव न मानगमातुरा।
पुनरुवाच सखीं दुहिता गिरेर्गिरिशगौरवमात्मपुरातनम् ॥ १

⊙

[2]गुर्जरीरागेण गीयते

हिमगिरिराजगृहे किल जन्म बभूव भवे हि पुरा मे।
तनुमजहीतमहं[3] पितुरग्रत एव स वेत्ति विरामे ॥ १

⊙

शृणु पुरहर! करुणामयि सखि! तस्या एव तत [4]स्त्वाम्। ध्रुवपदम्

⊙

जातु पितुः पुरतः किल कन्दु[5]कखेलनचटुलितमनसम्।
कमलजननतनयो मुनिरैक्षत[6] गिरिमभितश्च सुमनसम् ॥ २

⊙

मम पितरं वदति स्म तदा सुविलोक्य स करतलरेखाम्।
इति तनया विनयादभिलक्ष्यति सुरदुर्लभहरशेषाम् ॥ ३

⊙

मुनिरभिधाय जगाम गगनमिति धरणिधरोऽपि तदा माम्।
मयि शिवसेवनमाशु दिदेश दृशं विनिधाय स वामाम् ॥ ४

⊙

पितुरनुशासनमोमिति शिरसि निधाय [7]विधाय सपर्याम्।
पितुरनसश्च शिवस्य विधातुमगामहमपि परिचर्याम् ॥ ५

⊙

---

१. सङ्गमनोत्सुकम् क०। २. गुर्जरीरागे ख० ग०। ३. 'अजहीतम' इति रूपं हा धातोर्लङ्लकारे मध्यमपुरुषस्य द्विवचने भवति। अत्र उत्तमपुरुषस्य रूपमपेक्षितम्, अतः 'तनुमजहीम वयं' इति पाठः साधीयान्। ४. ततस्वी ख० ग०। ५. कन्दुकखेल क०। ६. रेक्षित क० ख०। ७. विधाय इति ग पुस्तके न विद्यते।

पशुपतिपदपरिचरणपरामवगत्य च मामम रेन्द्राः ।
तारकसुररिपुभयचकिताः किल मन्त्रमकुर्वत सेन्द्राः ॥ ६

यदि हि पशुपतिरुमामभिलषति करग्रहणे भजमानाम् ।
भवति चमूपतिरस्मदवनकृदुदार [1]इतोह समानाम् ॥ ७

इति निजसखि[2]पुरतो गिरिजावचनं जयतीह पवित्रम् ।
कल्याणं विदधातु [3]तदुपरिवर्णितमुदित[4]गिरित्रम् ॥ ८

चतुर्दशप्रबन्धः

आसीत् पूर्वयुगे स तारक इति ख्यातोऽसुरेन्द्रो जगत्,
क्लिष्टं येन विधेर्वरेण महसश्चैशाद्दते कस्यचित् ।
नो वध्योऽपि तदाम्बुजन्मजनकं तद्दुःखमिन्द्रादयः,
प्रोचुः प्राह स मत्परिग्रहविधिं शैवानुकूलत्वतः ॥ २

[5]गुर्जरीरागेण गीयते

सपदि विधाय मतं मदनं [6]सदनं व्रज शैवमिदानीम् ।
ऊचुरुमा हरतः सुतमेति शमेति जगन्ति तदानीम् ॥ १

सखि ! हे शृणु मम पूर्व[7]मुदन्तम् । ध्रुवपदम्

इति सुरवचनवशादुपगम्य शिवं मदनः सदनस्थम् ।
हन्तुमियेष तदैव ददाह महोऽसुमहो !! नयनस्थम् ॥ २

---

१. इति हसमानाम् क० । इतीह हसमानाम् ख० । २. अत्र 'सखि' इति ह्रस्वपाठश्चिन्त्यः । ३. तदुरुपति क० ख० ग० पुस्तकेषु । ४. गिरिजेत्रम् क० । ५. गुर्जरीरागे ख० ग० । ६. सदनम् ग इति प्रतौ न विद्यते । ७. अनन्तम् क० ।

पशुपतिरपि पदपङ्कजपूजनभाजनभुजसखियुक्ताम् ।
तद्वनतोऽपससार विसृज्य स माम[1]पचितिन्तु वियुक्ताम् ॥ ३

⊙

नयनदहनहतकुसुमशरासनविग्रह[2]दर्शनभीता ।
अहमपि पितृभवनं जयया शिवदृष्टिपथादपनीता ॥ ४

⊙

मनसि ततः [3]प्रभृति प्रणिधाय सदा शिवचरणसरोजम् ।
रहसि तपो वनगाऽकरवं निहतं सखि ! वीक्ष्य मनोजम् ॥ ५

⊙

मामतितपसि रतामवगत्य गतिर्जगता[4]मुरुरूपः ।
मत्पुरतः चिरमाविरभूद् द्विजवरवपुषा रविरूपः ॥ ६

⊙

चिरकृतमत्तपसः फलमन्धकसूदनदर्शनरूपम् ।
मम जनकः श्रुतवानकृताशुविवाहमयाद्यनुरूपम् ॥ ७

⊙

मयि कृपया पितुरेव गृहेषु ममाऽरमताऽपि [5]महेशः ।
मम वशगो मुदिताऽभवमहमिति सखि ! कल्याणकरेशः ॥ ८

पञ्चदशप्रबन्धः

⊙

कल्याणानि दधातु मे पशुपतिः कैलाशवासादिकं,
स्वीयं सौख्यमपास्य निन्दितमहो ! [6]श्वाशुर्यगेहेष्वपि ।

---

१. अपचिंतिस्त्रु ख० ग० । २. दग्रानि क० । ३. प्रणति ख० ग० । ४. अनुरूपः क० । ५. मयेशः ख० ग० । ६. श्वासूर्य क० ।

वासं रोचय[1]ति स्म योऽर्धवपुषि प्रीत्या दधौ मामहं,
मानं साऽकरवं मृडेऽपि महिमा दैवस्य चायं परः ॥ ३

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
पार्वतीपश्चात्तापवर्णनो नाम
षष्ठः सर्गः ।

---

१. यति स्तयोऽर्ध क०.....यतिसमयोऽर्ध ख०...यतीसमयोऽर्ध ग० ।

अथ सप्तमः सर्गः

पुनरपि विरह[1] विगाढं बाढं सख्या तदपि ब्रुवन्त्या सा ।
दुःखं सोढुमशक्ता[2] तस्या अग्रेऽब्रवीदुच्चैः ।। १

⊙

[3]वसन्तरागेण गीयते

⊙

क्षणमपि हरविरहं न समर्था ।
सोढुमसमसायकलसदर्था ।। १

⊙

साऽहं हरविरहेण विदूना ।
[4]सीदे सखि ! कदलीव विलूना ।। ध्रुवपदम्

⊙

हरपदपद्ममममरदुरवापम् ।
प्राप्य चिरादजहं चिरतापम् ।। २

⊙

[5]रहसि समेत्य रमेव रमेशम् ।
रेमे देवमहं हि महेशम् ।। ३

⊙

अहह !! कलहमनघेन विमूढा-
ऽकरवमहोऽत्र वसामि निगूढा ।। ४

⊙

अथ सखि ! कथय कथं शिवसङ्गः ।
पुनरपि भवति यथा [6]न हि भङ्गः ।। ५

⊙

१.विगाढाम् क० । २. असक्ता क० । ३.वसन्ते ख० ग० । ४.सीदति क० । ५.सहसि क० । ६. हि न क० ।

[1]द्रक्ष्ये सकृदपि पशुपतिपादम् ।
[2]त्यक्ष्ये तददर्शनजविषादम् ॥ ६

⊙

[3]कुरु तदितः सखि ! सत्वरगमनम् ।
मम समुपैति तथाऽऽचर भवनम् ॥ ७

⊙

इति कल्याणकरं गिरिजायाः ।
भवतु वचनमनघाऽऽचरितायाः ॥ ८

षोडशप्रबन्धः

⊙

इत्याकलय्य कलहान्तरिताऽचलेन्द्र-
पुत्र्योदितं विनयवाक्यमुवाच शर्वम् ।
गत्वा ततः सपदि शैवसखी सिताद्रि-
कुञ्जान्तरस्थगिरिजाऽऽग[4]मनाध्वदृष्टिम् ॥ २

⊙

श्रीकण्ठः श्रियमातनोतु सततं कुञ्जान्तरप्रोल्लसत्-
प्रौढस्तम्भतलेषु सन्मणिमयेष्वालेख्यरम्यामुमाम् ।
उद्वीक्ष्य स्तिमितेक्षणः क्षणमहो ! सद्विप्रलम्भोद्भवं,
दुःखं दूर[5]मपाकरिष्णुरसकृत्तद्ध्यानतः स्वात्मनाम् ॥ ३

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
कलहान्तरितावर्णनो नाम
सप्तमः सर्गः ।

⊙

---

१. दक्षे क०, दक्ष्ये ग० । २. त्यक्षे ग० । ३. अरुदितः क० । ४. नाच्चदृष्टिः क० । ५. मुपाकरिष्णुः क० ।

अथाष्टमः सर्गः

तामथ कलहान्तरितां शिवसङ्काशं [1]स्वयं तथाऽऽसक्ताम् ।
गन्तुं वीक्ष्य जगाम त्वरिताऽवोचद् वचो मुदिता ॥१

⊙

[2]गुर्जरीरागेण गीयते

जय जय हर ! रभसाद[3]वमत्य भवन्तमुमापरितापम् ।
विन्दति निन्दति निजवपुरलमवगत्य भवं दुरवापम् ॥१

⊙

सा विधाय भवता कलहं [4]परितप्यति कुप्यति मनसा । ध्रुवपदम्

⊙

[5]भुवि [6]परिपतति लुठति[7] मुहुरञ्चति रोदिति चिर[8]विरहेण ।
तव भव ! परिजनमङ्कगतं न विलोकयति स्मरणेन ॥२

⊙

विरहविनोदनवस्तुजातमभिलषति न परिजननीतम् ।
भवदवलोकनतः किमपीह न पश्यति परपरिणीतम् ॥३

⊙

रहसि समाधिबलेन भवन्तमुरसि विनिधाय चिरेण ।
[9]ध्यानगतं परिरभ्य सुखं समुपैति सुखैकभरेण ॥४

⊙

पृच्छति निकट[10]गताऽऽलिजनं मुहुरेष्यति कामनिहन्ता ।
किमु न [11]मया यदि [12]परजनुषि प्रभुरिति सह मे किल रन्ता ॥५

---

१. स्वये ग० । २. गुर्जरीरागे ख. ग. । ३. दवमन्य भवन्तुम् ग० । ४. परितश्यति ग. । ५. भुवम् ग० । ६. परितपति क. । ७. मुदंरचति ग. । ८. विरहिणा ग० । ९. धान्यगतम् ग० । १०. गतालि जनं ग० । ११. ममापदि क० । १२. परिजनुषि क० ग० ।

पुरहर ! हर चिरविरहभवं दरमग[1]पतिजा परितापम् ।
देहि दयालुतया शिवदर्शनमुग्रतपो दुरवापम् ॥६

⊙

साऽभिलषति परिरम्भसुखं भवदीयमनङ्गरसेन ।
रहसि दधाति हृदीश ! भवन्तमतीव समाधिवशेन ॥७

⊙

[2]इति कल्याणभणितमिह[3] जयतु सदाशिवसुखकरगीतम् ।
गिरितनयाऽऽलिकथितमनुकूलकरं शिवसन्निधिनीतम् ॥८

सप्तदशप्रबन्धः

⊙

इत्थं गिरीन्द्रतनयाऽऽलिवचो निशम्य,
शम्भुः शुभं शुभकरं शुभकृच्छिवायाः ।
[4]आसीत् शशीव शरदि प्रियदर्शनस्तां,
पप्रच्छ चेति चरितं विरहे तदीयम् ॥२

⊙

सा [5]चेद् दुनोति गिरिजा विरहे मदीये,
त्वं याहि पाहि मुदिता हि यथा हिताय ।
तस्यास्त्वरेण विरहेण यथा न सीदेत्,
सा तद् विधेहि विरहापहमद्वचोभिः ॥३

⊙

[6]नृत्योत्क्षिप्तकरीन्द्रचर्मविगलद्रक्ताङ्कनृत्यक्षिति- ।
क्षिप्तं पद्म[7]यवाङ्कुशादिविलसद्रेखाङ्कितं वन्दितम्,

---

१. पातिजा ग० । २. इति क पुस्तके नास्ति । ३. मिदम् क. ख. । ४. आसीच्छशीव ग० । ५. चे ग० । ६. नृत्योक्षिप्त ग० । ७. यवाङ्कुरादि क० ।

विश्वेशैस्तत[1] ताण्डवप्रविगलत्स्रक्पुष्पपुञ्जोल्लस-
त्पादाम्भोजमुपास्महे पुररिपोः पापापहं मुक्तिदम् ॥४

⊙

इतिश्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
[2](पार्वतीदशावर्णनो नाम)
अष्टमः सर्गः ।

●

---

१. स्तुत क० । २. एतत्कोष्ठान्तर्गतांशः क० ग० पुस्तकयोः नास्ति ।

अथ नवमः सर्गः

अथ पुररिपुणा सखी नियुक्ता,
निकटमपास्य हरस्य सा जगाम ।
तुहिनगिरिसुतासमीपमेत्य,
हरम[1]नुकूलमुवाच सा पुरोऽस्याः ॥१

⊙

कर्णाटरागेण गीयते

विमलजटातटविलसदमलजलधार[2]धराधरकन्यम् ।
मेरुशिखरमिव दिव्यधुनीकमनेककनकतरुधन्यम् ॥१

⊙

गिरिजे ! हरमनुसर[3]सरसिजमुखि ! सुखदायकसङ्गम् । ध्रुवपदम्

⊙

उज्ज्वलभाललसन्नयनाम्बुजराजितवदनसरोजम् ।
शरदि गगनमिव सितजलदान्तरभूमिजमुदितमनोजम् ॥२

⊙

विमलगलाऽसितविषमहसा परिशोभितसिततरकण्ठम् ।
सितगिरिमिव विषधरवरवलयितमिव हरिलोकविकुण्ठम् ॥३

⊙

लसदुपवीतधरं वरवासुकिमयमुरगाभरणेन ।
शोभित[4]सितमिव हरगिरिमिनजालसदञ्जनसलिलभरेण ॥४

⊙

दशकरदण्डविधृतविविधाऽऽयुधभीषितभक्तभयौघम् ।
तुहिनगिरीन्द्र[5]मिवाततितैस्तरुभिर्विलसच्छिखरौघम् ॥५

---

१. मनुकालम् ख०ग० । २. धरधरकन्यम् क०, धरकन्यम् ग० । ३सरसीरुह- ख० ग० ४. सितम् इति अधिकः क० । ५. मिवातिततैः ख० ।

भूतिसितं निजगिरिमिव जङ्गममिभरुधिराङ्कितचर्म ।
वपुषि दधानमिभेन्द्रमिवेन्द्रमुपरि विलसत्कुथनर्म ॥६

⊙

मुकुटशिखरगतशशिकरभूषितभवनविगततिमिरेण ।
प्रविश [1]पथा हरभवनमुमे! चल मामवलम्ब्य करेण ॥७

⊙

इति हरविग्रहवर्णनचारुचरितमिदमुदयतु गीतम् ।
कल्याणेन सुरासुरगीतसदाशिवपदमुपनीतम् ॥८

अष्टादशप्रबन्धः

⊙

पन्थानं तव पश्यतीच्छति पुनस्त्वद्दर्शनं काङ्क्षतं,
द्रागह्नाय मुहुर्मुहुर्वितनुते पुष्पैःस्रजं त्वत्प्रियाम् ।
नेपथ्यानि मणिप्रवेकविलसत्कान्तीनि कान्तः करो–
त्युच्चैर्हर्ष्यति चाकलय्य भवतीमुत्कण्ठितामीश्वरः ॥२

⊙

दाक्षायण्याः वियोगाद् हिमगिरिशिखरे तप्यमानस्तपः स्वं,
धामैवाऽनन्तधाम स्वमनसि विततं ध्यायमानो मुनीन्द्रैः ।
ध्यातोऽपि ध्येयमूर्तिमुनिवरवचसा वन्द्यमानो दुहित्र्याः,
भूभृद्राजस्य तस्या वदनसरसिजं वीक्ष्यमाणो हरोऽव्यात् ॥३

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
उत्कण्ठिता[2] वर्णनो नाम
नवमः सर्गः ।

---

१. यथा क० । २. वर्णने ख० ग० ।

अथ दशमः सर्गः

पुनरपि हरमनुकूलं विमलदुकूलं विशाललोलाक्ष्याः ।
पुरतो मुदिताऽ[1]वर्णयदतिमुदिताऽ[2]नङ्गमुत्कण्ठम् ॥१

⊙

[3]वसन्तरागेण गीयते

रचयति किशलयकुसुमदलौघमयं भुवि तल्पमनल्पम् ।
मनसि दधाति मुदं घटिकामपि कलयति युगशतकल्पम् ॥१

⊙

सुभगे ! पश्य शिवं शिवसङ्गम् ।
मा कुरु मानिनि ! यानविलम्बमुमे ! कुरु मानविभङ्गम् ॥ ध्रुवपदम्

⊙

तव नवसङ्गमिव पशुपतिरभिलषति शिवे ! तव सङ्गम् ।
त्वयि खलु मानमनसि विविधाधिरुपैतिमनोरथभङ्गम् ॥२

⊙

चकिततरैर्नयनैर्नयनाञ्चलवीक्षणविभ्रमशान्तम् ।
तव नवशशिनमिवाननमिच्छति तावकमृच्छति भासम् ॥३

⊙

नवविहारगृहकोणगतामिव कोकनदाननबिम्बे ! ।
त्वामवलोक्य मुदं समुपैति विधेहि मनो न विलम्बे ॥४

⊙

शशिमुखि ! शशिधरमनुसर हरमति दरमपहर हरचित्ते ।
तव विरहादुपगतमभिगमसुखमनुभव भगवति चित्ते ॥५

---

१. वर्णयति मुदिता क० अवर्णयदिति मुदिता ग० २. नगम् ख० ग० ।
३. वसन्तरागे ख० ग० ।

मर्मरमपि गिरिशृङ्गगतं स शृणोति यदा तमपर्णे ! ।
तव पदपद्मरणन्मणिनूपुररवमिव कलयति कर्णे ।।६

⊙

तद्गिरिजे ! गिरिशे गिरिसेविनि ! भव रभसादनुकूला ।
कलय वपुषि वलयादिविभूषणमुज्ज्वलकलितदुकूला ।।७

⊙

इति गिरिजालिललितवचनानि जयन्ति हि तानि शिवायाः ।
कल्याणानि ददतु भवभक्तजनस्य भवन्तु शिवायाः ।।८

एकोनविंशप्रबन्धः

⊙

उमां सखीसैव तथेरयित्वाऽनुकूलयित्वा गिरिशं च तां च ।
अनागमादन्धकसूदनस्य पुनर्बभाषे धृतभूरि[1]मानाम् ।।२

⊙

[2]देशाखरागेण गीयते

पुनरपि किमिति विषीदसि नेदम् ।
युक्तमुमे ! मयि जनयसि खेदम् ।।१

⊙

मुग्धे ! भज भवपादसरोजम् ।
कलय सुरासुर[3]नतपदमीक्षणदग्धसहेतिमनोजम् ।। ध्रुवपदम्

⊙

कतिकतिवारमहं भवदर्थम् ।
व्यर्थगता [4]भवता स निरर्थम् ।।२

⊙

युक्तिभेदपरिबोधितबुद्धिम् ।
भवमुपगम्य गमिष्यसि [5]सिद्धिम् ।।३

---

१. माना क० । २. देशाखरागे ख० ग० । ३. नव क० । ४. नवमास ख०, भवमास ग० गीतस्येयं पंक्तिः अस्पष्टा, विद्वदनुसन्धानमपेक्षते । ५. सिद्धम् क० ।

मम वचनं न करिष्यति भवती ।
[1]वद यदि काऽस्ति परा तव युवती ॥४

⊙

शृणु परितापमुपैष्यसि बाले ! ।
मम वचनं कलयिष्यसि काले ॥५

⊙

आनयामि वद पुनरपि शर्वम् ।
यदि न करिष्यसि भगवति ! गर्वम् ॥६

⊙

यत्कथयिष्यसि तदिह स कर्ता ।
वचनमुमे ! स हि दक्षिणभर्ता ॥७

⊙

इति कल्याणभणितसखिगीतम् ।
जयतु सदाशिवपदमुपनीतम् ॥८

[2]विंशप्रबन्धः

⊙

इत्थं [3]सखीवचः श्रुत्वा भूत्वा विगतमत्सरा ।
विस्मापयन्निव सखी[4]मद्रिजाऽऽह स्मितानना ॥३

⊙

[5]भैरवरागेण गीयते

पशु[6]पतिरेष समागमनेन समेत्य सखीह सलीलम् ।
स्वयमृषभेण भजामि तदा सुखयत्यमुमद्भुतशीलम् ॥१

⊙

सखि ! हे याहि समानय शर्वम् ।
तर्हि करोमि वचस्तव सर्वम् ॥ ध्रुवपदम्

---

१. भव यदि काऽस्ति क० । यदिहाऽस्ति ख० २. विंशतिप्रबन्धः ख० । ३. सखिवचः ग० । ४. अद्रियाह ख० ग० । ५. भैरवरागे ख० ग० । ६. पतिशब्दः क पुस्तके न विद्यते ।

मत्पुरतस्त्वमयि ! स्मरसुन्दरमानयसि स्मरशत्रुम् ।
हन्मि ! तदा सखि! मानरिपुं प्रसभेण वृषेव हि वृत्रम् ॥२

वद [1]वृषभध्वजमेवमुमा हर ! नैव विमुञ्चति मानम् ।
तामनुनेतुमितस्त्वरया हर ! रोचय सम्प्रति यानम् ॥३

श्रममतिवेलविहितममरेश ! ममाकलयेति वदेशम् ।
किं बहुनाऽऽलि ! ममाऽऽलपितेन चल त्वरिताऽपि नगेशम् ॥४

[2]त्वरितमुपैति यथा प्रमथाधिपतिर्मतिमति ! कुरु कृत्यम् ।
नाऽऽगन्ता [3]भर्ता जगतामिह यामि तदैव हि मृत्युम् ॥५

तत्कुरु सिद्धिमितस्त्वरिताऽऽलि ! चलाऽचलसानुनिषण्णम् ।
मृडमुपसादय हरविरहादुदितं[4] सखि ! दरमुपसन्नम् ॥६

नयनपथं मम याति यदा [5]पुरहाऽऽभरणव्रजसारम् ।
आशु ददामि तदैव हृदो मुदिता सखि ! हारमुदारम् ॥७

इति जयति प्रबलाघहरं स्वसखीपुरतो गिरिजायाः ।
इह कल्याणकरं वचनं कुसुमेषुरिपौ मुदितायाः ॥८

[6]एकविंशप्रबन्धः

इति गिरिसुतया सखीनियुक्ता,
हरमनुकूलयितुमुपागमत् त्वरेण ।

१.हरमेवमुमा ख० २. चरितम् ख० । ३. जगता भर्त्रामिह क० । ४.दुरितं क० ग० पुस्तकयोः ५.तदा पुरमरण क.६. एकविंशतिप्रबन्धः ख०ग० ।

तुहिनगिरिसुताऽपि चाकलय्याऽऽ—
गमनमुवाह मुदं त्रिलोचनस्य ॥४

⊙

चान्द्रीं मूर्ध्नि कलां दधच्च मुकुटे मुण्डानि मुक्ताफला—
न्यङ्गेष्वाभरणान्युरंगममयान्याप्तानि हेमात्मताम् ।
आमोदोल्लसदङ्गरागपदवी[1]माप्तां विभूतिं दधद्,
भूतिं नः स्मरकोटिसुन्दरवपुर्गेयाद्दधानो हरः ॥५

⊙

इति श्रीगोतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
मुदितमन्मथान्तको नाम
दशमः सर्गः ।

---

१. माप्तञ्च भूतिं क० ।

अथ एकादशः सर्गः

अत्रान्तरे पलमितः किल [1]कल्पकल्पः,
[2]कालो बभूव पथि लोलविलोचनायाः ।
[3]ईशागमे सखिजनेन कृते विलम्बे,
सा तापमाप शफरी पुलिनं गतेव ॥१

⊙

[4]प्राच्या मुखं रविरथात्मकरैर्विमृज्य,
तूर्णं जगाम [5]परिरञ्जयितुं प्रतीचीम् ।
सा रागमावहति [6]तस्य समीपमाप्ते,
तस्मिन् प्रियेव मुदिताऽथ बभूव संध्या ॥२

⊙

सन्ध्यारागविराजितेऽम्बरतले रेजे रविर्बिन्दुवत्,
सिन्दूरस्य सुलोचनाऽलिकतले रक्तेऽतिरोषादिव ।
प्राचीदिङ्मुखगेन्दुमीक्ष्य परमं मित्रत्वमाप्तः स्वयम्,
तस्मादेव कलङ्किवीक्षणभयादस्तं हि [7]यात्यन्वहम् ॥३

⊙

प्राचीमुज्ज्वलयंस्तमः [8]कवलयन्नुद्भासयन् पङ्कजा—
न्यात्मीयानि रवेरथो मुकुलयन्नुत्कण्ठयन् मानसम् ।
[9]उत्कण्ठां कुलटागणस्य कलयन् ज्योत्स्नाभिसारत्वरा–
मातन्वन् विरहव्यथां विरहिणामिन्दुः समुज्जृम्भते ॥४

---

१. कल्पकालः क० ग० । २. काल इति ग० पुस्तके न विद्यते । ३. इशागमे ग० । ४. प्राच्यां क० ५. प्रतिरञ्जयितुं ख० ग० । ६. च स्म क० ख० ग० । ७. यात्वन्वहम् क० । ८. कुवलयन् ख० ग० ९. उत्कानां ख० ग० ।

दृष्ट्वेन्दुबिम्बं परिपक्वबिम्बफलाधरोष्ठी[1]परितो दिशोऽष्टौ,
आमोदहृद्या[2]मधुनाऽनवद्या [3]प्राप्तेश[4]चिन्ताऽतिचिरेण तापम् ॥५

⊙

[5]वसन्तरागेण गीयते

अमृतमयवपुरहो ! जगति त्वम् ।
भवसि वहसि मयि किमिति विषत्वम् ॥१

⊙

शिव शिव वामो विधिरधुना मयि मन्ये । ध्रुवपदम्

⊙

हरमुकुटस्थितिरसि जगदिन्दो ! ।
सुखयसि मौषधिरोहिणिबन्धो ! ॥२

⊙

मा भज मलयपवन ! मम देहम् ।
हरविरहेण विहितविविधेहम् ॥३

⊙

सखि ! सुखकर[6]मपसारयतेदम् ।
विरह[7]विदूनमुखं किल नेदम् ॥४

⊙

पृच्छति संनिहितं सखि[8]वर्गम् ।
अस्ति काऽपि शंसति या भर्गम् ॥५

---

१. परितौ ख० ग० । २. प्तधुना ख० ग० । ३. प्रापेश क० ख० । प्राप्येश ग० । ४. चिन्ताऽति इति ग० पुस्तके न विद्यते । ५. वसन्तरागे ख० ग० । ६. उपसारयत ख० ग० । ७. विदनसुखं ग० । ८. गर्वम् क० ।

आनयाऽऽलि ! विरहानलशमनम् ।
सत्वरममरवरं स्मरदमनम् ॥६

⊙

मधुमदनानिलकोकिलनादाः ।
सखि ! तुदन्ति भृशमिव रिपुवादाः ॥७

⊙

इति कल्याणकरं गिरिजायाः ।
जयति वचनमनघाचरितायाः ॥८

[1]द्वाविंशप्रबन्धः

⊙

इति हरविरहेण [2]विह्वलाक्षी,
विलपति यावदुदारवेषधारी ।
गिरिवरतनयाऽग्रतः पुरारिः,
प्रियसखिसंयुत[3] आजगाम तावत् ॥९

⊙

क्रोधं संहर संहरेति मुनयः शक्रादयश्चाम्बरे,
संस्तुन्वन्ति, समाधिविघ्नजनकं पश्यन्नि[4]दानं हरः ।
यावत्तावदितस्ततश्च सशरं [5]पृष्ठे शरं [6]तेजसा,
सा लोलाक्षिभवेन भस्म विदधद् दृष्ट्वा शिवायाऽस्तु नः ॥ ७

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये कल्याणकृते
शिवप्रसादनो नाम
एकादशः सर्गः ।

⊙

---

१. द्वाविंशति इति क० ख० पुस्तकयोः । २. क्षि क० ३. संयुतम् क० ।
४. विदानं क० ग० । ५. पृच्छे क० । ६. तेजसा ग० ।

अथ द्वादशः सर्गः

अथाऽऽगतं[1] वीक्ष्य [2]सखीसमेतं,
शिवं शिवा सानुनयं वचांसि ।
ब्रुवन्तमन्तर्मुदमाप चाऽऽत्म--
न्युरूढमानं शिथिलीचकार ॥ १

⊙

[3]गुर्जरीरागेण गीयते

धवलगविस्थधवलशशिभूषणधवलधुनीधरदेवम् ।
धवलवृषध्वज[4]धवलवपुर्धर[5]धवलविभूतिदसेवम् ॥ १

⊙

सा ददर्श गिरिजा गिरिशं [6]गुरुशङ्कितसस्मितचित्ता । ध्रुवपदम्

⊙

धवलयशोधवलीकृतविश्वधवलसुमनःप्रियमीशम् ।
धवलभुजङ्गभुजाऽऽभरणं स्तुतिसङ्गतसर्वदिगीशम् ॥ २

⊙

[7]धवलविहंगमधवलपुष्पपरिपूजितधवलपदाब्जम् ।
धवलदन्तदीधितिधवलीकृतकण्ठनालवदनाब्जम् ॥ ३

⊙

धवलवसनधरधवलहारधर[8]सुरवनिता[9]परिगीतम् ।
धवलकपालकलितकरकङ्कणधवलमुण्डपरिणीतम् ॥ ४

---

१. गते ख० गतो ग० । २.सखासमेतम् ग० । ३. गुर्जरीरागे ख० ग० । ४. वृषभध्वज क० । ५. धवविभूषिद् ग० । ६. शुभाङ्कितसस्मयाचित्ता क० । ७. विरङ्गम क० । ७. 'धर' इति क० प्रतौ न विद्यते । ९. अत्र 'निपतिता' इति अस्पष्टं पाठाधिक्यं क प्रतौ ।

धवलस्मितधवलीकृत[1]मन्दर कन्दरसुन्दरभावम् ।
धवलभाव[2]भावितपदपङ्कजभक्तदुरितवनदावम्[3] ॥ ५

⊙

धवलाऽमलमुक्ताफलहारधरं धवलाऽचलभासम् ।
अनुकुर्वन्तमधश्[4]चरितारुधवलजलधारविलासम् ॥ ६

⊙

धवलचमरयुगलेन धवलजलधारधवलगिरिभासा ।
धवलधामचिन्तनधवलीकृततनुमतिसिततरभासा ॥ ७

⊙

असितदुरितमलिनीकृतजनधवलीकरणक्षमधाम ! ।
जयति जगति कल्याणनुतं[5] विश्वेशधवलतरधाम ॥ ८

[6]त्रयोविंशप्रबन्धः

⊙

दृष्ट्वाऽन्तिके[7] समनुकूलमुपागतं[8] तं,
[9]त्यक्त्वाऽभिमानमुरगाभरणं भवानी ।
स्वाधीनमुज्झितचिरोढमहाभिमाना[10]
[11]मारारिदर्शनसुखाम्बुनिधौ [12]ममज्ज ॥२

⊙

स्वेदार्द्रसुन्दरतनुं [13]सुतनुं स्फुरन्तीं,
रोमाञ्चितामतितरां प्रतिरुद्धवाचम् ।
कम्पोत्तरेण [14]वपुषेव विराजमानां,
मारारिराह विगते बहिरालिवर्गे ॥ ३

---

१. मन्दिरकन्दर क०, कदेरमन्दर ग० । २. मार क० । ३. दाहम् क० । ४.कुर्वन्तु क० । ५.युतम् क० । ६.त्रयोविंशति क० ख० । ७.अन्तिते ख० ग० । ८. स्वम् ख० ग० । ९.मुक्ता ख० ग० । १०. मानी क० । ११. सारादि क० मारादिरि ग० । १२. नमज्ज क० । १३. सुतनं ग० । १४. वपुषेव ग० ।

किन्ते प्रियं प्रियतमे ! करवाणि बाणैः,
प्राणान् क्षिणोति मृदुवाणि ! स पञ्चबाणः ।
तन्मामवैहि वशवर्तिनमद्रिजाते !
तातेन [1]तुल्यमयि ! मा कुरु मानसं [2]स्वम् ॥ ४

⊙

त्वत्प्रेषितालिवचनैरहमागतोऽत्र,
तां त्वाऽनुनेतुमधुनाऽपि [3]जहाहि मानम् ।
[4]मुक्तेरयस्व वचनानि हितानि यानि,
मोदं ममाद्य जनयन्ति सुधासमानि ॥ ५

⊙

इत्युक्तवत्यचलराजसुताऽ[5]मरेश-
मानं विमुच्य मुदिताऽ[6]तितरां बभूव ।
तेनाचकाङ्क्ष [7]सह रन्तुमनन्तभावा,
भावावबोधमुररीकृतमुत्ससर्ज ॥ ६

⊙

गौरी स्वाधीनमालोक्य लोकेशं लोललोचना ।
लालयामास लीलाभिस्त्रिलोचनमनारतम् ॥ ७

⊙

किन्ते वाञ्छितमस्ति वस्तु गिरिजे ! [8]किं कर्तुकामाऽसि वा,
वामे ! मां त्वदधीनमद्य सुभगे ! जानीहि सा शम्भुना ।
[9]इत्युक्ताऽऽह तदा स्म देव ! परमे देवद्रुमालङ्कृते,
यावः [10]सुन्दरमन्दरान्तरगते नौ वल्लभे मन्दिरे ॥ ८

⊙

---

१. कुज्य क० । २. स्वाम् क० ग० । ३. जहीहि क० । ४. अस्पष्टार्थः ।
५. नरेश क० । ६. नितरां क० । ७. महरमनन्तभावा क० । ८. कर्तुकामा शिवा क० । ९. इत्युक्त्वा क० । १०. सुन्दरमन्दिरान्तरगते क० ।

ओमित्युक्तवताऽन्विताऽद्रितनया तेनाऽतिरम्ये गिरौ,
गत्वा सा सुषुमापतिं सुरभिजां वीक्ष्यानुकूलं च सा ।
आह स्माऽत्र पुरो मम[1] प्रियतम ! [2]प्रेष्ठप्रदेष्टं त्वया,
दत्तं देहि नरीनृतीहि मुदिता यावद्भवामि[3] प्रभो !! ॥ ९

⊙

तथेत्यु[4]दीर्याद्रि[5]सुतापुरस्तादुत्क्षिप्य कृत्तिञ्च वितानतान्तम् ।
ततान नृत्यं कटिपादपद्मकलक्वणत्किंकिणिकः पुरारिः ॥ १०

⊙

[6]रामकरीरागेण गीयते

भूतिविभूषितगौरकलेवरकृत्तिवसनवनवासी ।
प्रेमकुपिततुहिनाऽचलजापुरतः परनृत्यविलासी ॥ १

⊙

विहरति [7]मन्दरगिरिशिखरे ।
पशुपतिरलिकुलरवमुखरे ॥ ध्रुवपदम्

⊙

गुञ्जदलिव्रजकोकिलकाकलिकाकलिकारमणीये ।
नीलकण्ठ[8]परिसेवनसंगत[9]सुररमणीरमणीये ॥ २

⊙

नृत्य[10]समुद्धृतकृत्तिवितानतले विमले ललितेन ।
गीतिविधानकलाविधिना परिनृत्यति नर्मयुतेन ॥ ३

⊙

ताण्डव[11]तान्तलसद्भ्रमणीपतदुज्ज्वलपुष्पपरागम् ।
यत्र किरीटशिखासु वहन्ति सुरप्रवरा नवरागम् ॥ ४

⊙

---

१. प्रियतमे क० । २. प्रेक्ष्य प्रदेष्टम् क० । प्रेष्ट यदेष्ठम् ग० । ३. प्रभौ ग० । ४. उदार्यं ग० । ५. सुता इति ग० प्रतौ नास्ति । ६. रामगरी क० रामकरीरागे ख० ग० । ७. मन्दिरगिरि ग० । ८. परिवसन ग० । ९. सुररमणीये क, हररमणीरमणीये ख० ग० । १०. समुन्नद्वृता ग० । ११. तां न लसद्रमणी क० ।

श्रीनटभैरवपञ्चममेघवसन्तसमस्वररागम् ।
शैलसुतापरितोषकृते विदधाति षडङ्गविभागम् ॥ ५

⊙

दशकरतालतरलनयनाञ्चलकिंकिणिनूपुरनादम् ।
वीक्ष्य शिवा शिवनर्तनमद्भुतमास विहाय विषादम् ॥ ६

⊙

पञ्चवक्त्रसमुदीरितसुस्वर[1]सर्वसुरेडितगीतम् ।
जयति विधाय भवानिमनःस्वनुकूल[2]मुरुस्मयनीतम् ॥ ७

⊙

शैलसुताशिव[3]मन्दरकन्दरसुन्दरमन्दिरलीला ।
कल्याणेन सदा शिवदा [4]कथिता दुरितक्षयशीला ॥ ८

[5]चतुर्विंशप्रबन्धः

⊙

[6]इत्थं मन्दरकन्दरासु विलसद्हर्म्यासु रम्यासु तां,
शैलाधीशसुतां विधाय विगतक्रोधां पुरो नर्तनैः ।
स्वाङ्गेभ्योऽखिलसौख्यदान् सह तया रागान् समुत्पाद्य तत्,
प्रीत्यर्थं विजहार हारवलयाद्याभूषणाऽऽभूषिताम् ॥११

⊙

गुणाऽतीतोऽपीशः स्मररिपुरपि स्वात्मनिरत-
स्तपोनिष्ठोऽप्यात्मन्युपरमितशब्दादिविषयः ।
अपीशः सर्वेषामसुरसुरसंसेवितपदः,
पुरो नृत्यं चक्रे गिरिदुहितुरानर्तितभवः ॥ १२

⊙

नृत्यं विधाय तां तुष्टां तिष्ठन्तं च पुरः[7] प्रभुम् ।
स्वाधीनपतिका गौरी [8]गिरीशम् सस्मिताऽब्रवीत् ॥ १३

⊙

---

१. सर्व इति क० प्रतौ नास्ति । २. सुरस्मय क० । ३. मन्दिर क० । ४. कथिता ग० प्रतौ नास्ति । ५. क० ख० पुस्तकयोः मूले तु चतुर्विशति इति । ६. इत्यंछं ग० । ७. प्रभुः क० । ८. गिरिशम् क० ।

[१]रामकरीरागेण गीयते

शृणु पशुपालक ! बालकलाधर ! मा धर [२]गलगरलं सदा ।
भवति यदपि [३]सुषमा विषमा दधतो भवतो मम दुःखदा ॥ १

⊙

[४]गिरिजा हरं निजगाद सा ।
तदुदीर्णमोदमदालसा ॥ ध्रुवपदम्

⊙

कुरु हर ! नन्दनचन्दनतरुकुसुमै[५]रुरसि स्रजम् ।
कुचकलशे किल शङ्कर ! कुरु भुजगाऽऽभरणाऽऽभरणस्रजम् ॥ २

⊙

विषमविलोचन ! [६]लोचनमनिमिष[७]मनिमिषवर [८]मे तथा ।
[९]भगवति भवति भवती [१०]भववीक्षणसुखमनुभव परमं यथा ॥ ३

⊙

तव शशिशेखरमभिनव[११]मभिनयवत्सलवत्सवत्सलम् ।
रचय शिरसि[१२]शिरःस्थितगङ्ग ! यदङ्गमिदं तव वत्सलम् ॥ ४

⊙

मुनिजनभूषण ! भूषणभूषितममलतरं तव विग्रहम् ।
कुसुमविशिखविशिखाविषयारचयारचय त्वदनुग्रहम् ॥ ५

⊙

भव ! भवभञ्जन ! [१३]सुररिपुगञ्जन [१४]रञ्जनराजितलोचनम् ।
[१५]सभ्रमराम्बुज विभ्रममेति हि कोकनदस्मयमोचनम् ॥ ६

⊙

---

१. रामगरीरागेण क०, रामकरीरागे ख० ग०। २ गल इति क० प्रतौ नास्ति । ३. सुषमा दहतो क० । ४. गिरिजाधरम् क० । ५. रसमै ख० ग० प्रत्योः अधिकः । ६. लोचन ग० प्रतौ न विद्यते । ७. मानिमिष क० । ८. ते ख० ग० । ९. भगवती भवती भवती क० । १०. भवतीक्षण क० । ११. मभिनयवत्सलवत्सलम् क० मभिनववत्सलम् ग० । १२. शिरसिस्थित क० ग० । १३. मुर ख० ग० । १४. रञ्जन इति क प्रतौ नास्ति । १५. सभ्रमसंबुज-विनम्र ग० ।

भगवदुदारविहारविलोकननिर्गतनिर्भरविग्रहम् ।
कुसुमशरासनदहन ! शरासेनहतमख ! कुरु सदनुग्रहम् ॥ ७

⊙

श्रीकल्याणकरे कल्याणवचसि दुरितव्रज[1]खण्डने ।
कुरु हृदयं सदयं जन ! हरिहरचरणभजनजनमण्डने ॥ ८

[2]पञ्चविंशप्रबन्धः

⊙

हर ! परिहर कण्ठात्कालकूटं करालं,
कलय कुसुममालां मुञ्च मौलिस्थबालाम् ।
भव ! भवतु न जातु [3]त्वद्वियोगो ममेति,
प्रतिवचनमवोचद् धूर्जटिस्तत्तथेति ॥ १४

⊙

भास्वच्छं भुवि तान्तताण्डवलसल्लीलाविलासव्रजा-
ल्लोकोल्लासभरप्रमोदमुदिताऽपर्णोक्तवाक्यामृतैः ।
स्वाधीनस्वहृदीशयाद्रिसुतया हृष्टोऽष्टमूर्तिश्चिरं,
पायात्पापदवाग्निदीप्तिशमनः श्रीनीलकण्ठश्चिरम् ॥ १५

⊙

भूतिं यच्छतु भूतिभूषितवपुः शम्भुर्भवानीभया-
दुन्नीयाऽऽत्मकरान् वरानभिनयव्याजाद् धुनीं निह्नुवन् ।
मूर्तामात्मकपर्दगामभिनवां तैरेव नृत्यक्षण-
भ्राम्यद्भीमवपुर्विभूतिधवलीभूताम्बराऽऽडम्बरः ॥ १६

⊙

गृहीत्वा केषाञ्चित्कतिपयपदानि प्रतिपदं,
प्रबन्धः प्रारब्धो भवति हि कवीनां किमु मुदे ।

---

१. मण्डले क० । २. क० ख० पुस्तकयोः मूले तु पञ्चविंशति इति । ३. तद्वियोगो क० ।

मुदे स्यादेवायं यदि हि शिवयोर्या प्रतिपदं,
जगत्पित्रोर्लीला जयति जगदंहःप्रशमनी ॥ १७

⊙

गौरीशयो रहःकेलिं प्रच्छन्नां वा प्रकाशिकाम् ।
वर्णयन्ति जगत्पित्रोः कवयः कोविदाः [1]कथम् ॥ १८

⊙

भवानीशङ्करौ यावच्छङ्करौ जगतामियम् ।
भवतां भुवि कल्याणवाणी कल्याणकारिणी ॥१९

⊙

इति श्रीगीतगङ्गाधराभिधाने
महाकाव्ये श्रीकल्याणकृते
स्वाधीनपतिकाशिवा
सौभाग्यवर्णनो नाम
द्वादशः सर्गः ।

---

१. कथाम् क० ।

परिशिष्टम्

पद्यानामनुक्रमणिका

●

गीतानामनुक्रमणिका

समागतवृत्त-लक्षणानि सूची च

[प्रथमा सङ्ख्या सर्गस्य द्वितीया च श्लोकस्य]

●

अनुष्टुप्—श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥
(१) ५, ६ (२) १ (१०) ३ (१२) ७, १३, १८, १९

आर्या— यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या ॥
(४) १ (७) १ (८) १ (१०) १

उपजातिः—अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।
(१) ९, १२, १३ (२) ३, ४ (४) ७, (५) १, २ (६) १ (१२) १०

उपेन्द्रवज्रा—उपेन्द्रवज्रा जतजास्ततो गौ
(१) १५ (१०) २ (११) ५ (१२) १

कालभारिणी—विषमे ससजा यदा गुरू चेत् सभरा येन तु कालभारिणीयम् ।
(३) ३

गीतिः आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ।
दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः ॥
(१) १६

पुष्पिताग्रा—अयुजि नयुगरेफतो यकारो
युजि च न जौ जरगाश्च पुष्पिताग्रा ।
(९) १ (१०) ४ (११) ६

पृथ्वी— जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।
(१) ४

मालिनी– ननमयययुतेयं मालिनी भोगिलोकैः ।
(१२) १४

वसन्ततिलका–उक्ता वसन्ततिलका तभजा जगौ गः
(२) ६ (७) २ (८) २, ३ (११) १, २ (१२) २, ३, ४, ५, ६

शार्दूलविक्रीडितम्—सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् ।
(१) १, २, ३, ७, ८, १०, १४, १७ (२) ५, ७ (३) १, २, ४
(४) ६, ८, ६, १० (५) ३, ४ (६) २, ३ (७) ३ (८) ४ (६)
२, ३ (१०) ५ (११) ३, ४, ७ (१२) ८, ६, ११, १५, १६ ।

शालिनी– मात्तौ गौ चेच्छालिनी वेदलोके ।
(४) ४, ५

शिखरिणी–रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।
(१) ११ (२) २ (१२) १२, १७ ।

समागतरागाणां लक्षणम्

⊙

१. कर्णाटरागः—अस्य लक्षणम्

शुद्धा सप्तस्वरास्तेषु गान्धारो मध्यमस्य चेत् ।
गृह्णाति द्वे श्रुती गीता कर्णाटी जायते तदा ॥

प्रबन्धः—१८ (लोचनकृतरागतरङ्गिण्याम्)

२. केदाररागः—अस्य लक्षणम्

गनी तीव्रतरे मेले केदारः श्यामनाटकः ।
भूपाली चेति केदारः सम्पूर्णे गादि मूर्च्छनः ॥

प्रबन्धः—७ (हृदयप्रकाशे)

३. गुर्जरीरागः—अस्य लक्षणम् अयं मिश्रितरागः ।

तोडिकैव किल गुर्जरी मता, पञ्चमेन रहिता यदा भवेत् ।
संवादादृषभधैवतांशिनो, गीयते सुमतिभिश्च जङ्गवे ॥

(रागकल्पद्रुमाङ्कुरे)

४. देशाखरागः—अस्य लक्षणम्

रिमौ यमौ सधपमाः परिगमरिसास्तथा ।
देशाखो हि विशेषेण षाडवः कथितो बुधैः ॥

प्रबन्धः—११, २० (हृदयकौतुके)

ग्रहांशन्यासरिः पूर्णा प्रातर्गेया तु सुन्दरी ।
बहुली मिश्रिता नित्यं षड्जहीना क्वचिद्भवेत् ॥

प्रबन्धः—४, ६, १०, १४, १५, १७, २३ (रसकौमुद्याम्)

प्रबन्धः २

५. भैरवरागः—ग्रन्थेष्वस्य यानि विभिन्नलक्षणानि सन्ति तानि अनूपसङ्गीतविलासे संगृहीतानि सन्ति—

रत्नाकरमते प्राह भैरवस्तत्समुद्भवः ।
धांशो मान्तो रिपत्यक्तः प्रार्थनायां समस्वरः ॥

धैवतांशग्रहन्यासः सम्पूर्णः स्यात् समस्वरः ।
तारमन्द्रो यथा षड्जो गान्धारः शुद्धभैरवः ॥
भैरवे तु रिपौ न स्तो धैवतादिकमूर्च्छनः ।
तत्रोक्तौ च गनी तीव्रौ कोमलो धैवतः स्मृतः ॥

प्रबन्धः २१ (अनूपसङ्गीतविलासे)

६. मालवगौडीरागः–अस्य लक्षणम्

मालवगौडी नाम कश्चिद् रागो। सङ्गीतशास्त्र विदुषां मते मालवगौडराग एव मालवगौडीनाम्ना लोके व्यवहृतो भवति।

अथ मालवगौडेऽस्मिन् गौरीस्वरसमुद्भवे ।
त्यक्तधे रि स्वरोद्ग्राहे न ह्यारोहे सुगस्वरः ।
आरोहे यदि गान्धारः पादिर्मान्तो विधीयते ॥

प्रबन्धः १ (सङ्गीतपारिजाते)

७. मेघरागः

पर्यङ्के प्रियया सार्द्धमासोनमुपवर्णयन् ।
पीताम्बरः सुभूषाढ्यो मेघरागो घनद्युतिः

प्रबन्धः ५ (रसकल्पद्रुमे)

८. रामकरीरागः––अस्य लक्षणम्

रिकोमला गतीव्रा या मतीव्रतरसंयुता ।
ध कोमला नितीव्रा च ख्याता रामकरीति सा ॥
आरोहे मनिवर्ज्या स्यात् पांशा धैवतमूर्च्छना ॥

प्रबन्धः ३, ९, १३, २४, २५। (सङ्गीतपारिजाते)

९. वसन्तरागः–अस्य लक्षणम्

षड्जादिमूर्च्छने मान्ते गनीतीव्रौ वसन्तके।

प्रबन्धः ८, १२, १६, १९, २२ (सङ्गीतपारिजाते)